No. 4300- घ

Title बालप्रकाश प्रथमाध्यायः

Author

Extent 32 Age

Subject

नं० ४३०० – घ

(बालप्रकाशः प्रथमाध्यायः)

नं० ४३०० – घ

बा॰ ५



=अध्यायः३ =प्रमाणे२

बाल· प्र· श्रीगणेशायनमः॥ अर्थद्वादशलक्षण्याः संक्षिपत्यर्थांकरः जिज्ञासुभ्योऽतिबालेभ्योऽतिस्फुटंग

१ हनं ततः॥१॥ लक्षणशब्दो मीमांसाशास्त्रे प्रमाणाध्याययोर्दृष्टः। चोदनालक्षणोऽर्थो धर्मः अथातः

शेषलक्षणमिति। तेन द्वादशलक्षणी द्वादशाध्यायी। तस्या धर्मोऽर्थो विषयः॥ तदुक्तं। अथातो धर्मजि

ज्ञासासूत्रमाद्यमिदं कृतं· धर्मोऽस्य विषयो वक्तुं मीमांसायाः प्रयोजनमिति॥ धर्मशब्देन च गौतमीयादि

वन्नापूर्वमुच्यते किं तु तत्साधनं यागाद्येव॥ तदुक्तं श्रेयस्करमाख्ये धर्मश्च फलसंबद्धं कर्म यागादि वर्ण्य

ते इति। अपवादनयाच्चात्राधर्मोऽपि जिज्ञास्यो द्वितीयलक्षणेऽभेदापवादत्वेनाभेदवदिति न शास्त्रस्य वि

षयनानात्वशंका। इह च धर्मजिज्ञासापदं न विचारं लक्षयति। औपनिषदानां तु ब्रह्मजिज्ञासापदं तं।

लक्षकमिति वैलक्षण्यं। धर्मं जिज्ञासितुमिच्छेत् तस्माद्धर्मो जिज्ञासितव्य इत्यादि भाष्ये संबंधं क्रियया एम·

ते र्वैषबन्धैशास्त्राच्चते टुप्टीकादिवार्तिके न व्याख्यार्थे च न्यायरत्नाकरे अध्ययनजिज्ञासाक्रिययोः॥ १

=अध्याये४ =विचार३

=विचारात१ विचार१

४ संबंधमर्थे शब्दो ह्यतेतेच शास्त्रादनंतरं भिन्नेन नहि जिज्ञासा शब्दो मीमांसापर्याय इति श्रौतार्थपरत्वस्यैवाक्तेः
तथा चानंतर्यवचोव्यक्तिः एक्षितेवात्र गम्यत इति वार्तिके अथशब्द आनंतर्यार्थो नाधिकारार्थ इत्युक्तं जिज्ञा
सापदस्य च विचारलक्षकत्वेधिकारार्थताप्यविरुद्धेति॥ तृतीये तूक्तम्ः प्रथमाध्यायप्रथमसूत्रे हि धर्म्म
ज्ञाने छायावक्ष्यमाणप्रामाण्यत्वेनानुपन्यासादनंतरानुष्ठेयमात्रमेवोपदेष्टव्यमित्यधिकारार्थत्वं नोक्त
म्ः इह त्वध्यायरूपं वाक्यार्थात्मकमेव वाक्यत्वियमधिकर्तुं हि शक्यते शेषत्वलक्षणमिति ग्रंथयोराद्येप्र
थमसूत्रे विचारानुपादानादधिकारार्थताथ शब्दस्य नास्तीत्युक्तम्ः द्वितीयग्रंथे तु तृतीयाध्यायाद्यसू
त्रे विचारोपादानादधिकारार्थतेति तस्मात्सर्वस्य शास्त्रस्य धर्मो विषयः॥ द्वादशानां त्वध्यायानां द्वादश
विषयाः॥ प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिकाराः सामान्यातिदेशविशेषातिदेशोहवाधतंत्रप्रसंगा
ख्याः सम तत्वाशास्यार्थस्य द्वादशविधस्यैवास्यामाणस्यप्रतिज्ञापिंडोयं धर्मजिज्ञासेतीति भाष्यका

बाल० प्र० ऐ भावाभावविषयाष्टविधजिज्ञासापरतयाधर्मजिज्ञासापदंव्याकुर्वन्संक्षिप्यदर्शयति॥ कोधर्मः
२ कथंलक्षणः कान्यस्यसाधनानिकानिसाधनाभासानिकिंपरश्चेति। तत्राष्टविधत्वंतावदाहोस भा
जिज्ञासायाः साधनइवधर्मस्वरूपतत्प्रमाणतत्फलेष्वपियोजनेनाभिप्रेतं। तत्रापिलक्षणशब्दः
२ प्रमाणवचनउपदेशमिवातिदेशंतत्प्रमाणंकौचोदनावाधावतिदिष्टपदार्थधर्मप्रतियोगिभ्यांतोसं
गृह्णाति। लक्षणशब्देनैवचोपदेशातिदेशोवदतोपरिष्टातिदिष्टपदार्थधर्मभ्यतोतंचप्रसंगोसंगृ
हीतो। साधनशब्देनचसाधनाङ्गांगधर्मभ्यतोप्रयुक्तिक्रमोसंगृहीतो॥ अत्रैवचतन्त्रेधर्ममीमांसा
रभ्यानवेतिचिंत्यते। तदर्थंचाथशब्देनयोग्यतयाध्ययनानंतर्यमुक्त्वाधर्मजिज्ञासाकर्तव्यत्वोपदेशा
त्मकजैमिनिसूत्ररूपस्यसाधीतस्वाध्यायादितिस्मृतिर्वाध्यानवेति॥ तदर्थंचाध्ययनविधिः स्वर्गाद्य राम०
दृष्टार्थउतफलवदर्थावबोधरूपदृष्टार्थइति। तत्रसस्वर्गः स्यादितिविश्वजिन्न्यायेनपूर्वपक्ष २

यित्वाद्दृष्टे संभवत्यदृष्टकल्पनानवकाशात्सिद्धांतितं ॥ ततश्चाध्ययनविधिमूलया जैमिनिस्तत्र स्मत्सा

धीसस्नायादिति स्मृतेर्बाधाद्यथावदर्थज्ञानार्थन्यायनिरूपणात्मिका मीमांसारभ्या। तत्राध्ययनवि

धौ स्वाध्यायमिति द्वितीययागुणत्वमेव लक्ष्यतेन्यथा स्वाध्यायेवाजपेयवाक्य इव यागेगुणविधौ वैरू

धि प्यापत्तेरिति भवदेव ४। तन्न। अप्रमाणस्य वाक्यस्यानर्थकविकल्पने: लक्षणा वाक्यभेदादिदोषाना

न नुमितेस्त्वसाविति वार्तिकोक्तन्यायैः परिहारात् अत्र शोधपत्रम्॥ ॥इत्युपोद्घात ४ एवं द्वादशल ६

क्षणार्थेषु जिज्ञास्येषु स्वरूपानंतरमपि जिज्ञास्यतयोक्तप्रमाणमानाधीनामेयासिद्धिरिति प्रथ

मेनाध्यायेनादौ निरूप्यते। तच्चानेकविधं विध्यर्थवादमंत्रनामधेयस्मृत्याचाररूपं। तत्रार्थवा हृष्टथ

क्रत्वसविध्युद्देशापरनाम्नो विधेः फलांशेविध्युद्देश इति भाष्यकारलक्षितस्य धर्मे प्रामाण्यमाद्य

पादे निरूप्यते। तत्प्रतिज्ञार्थचोदनासूत्रं। तदुक्तं चोदनाचोपदेशश्च विधिश्चैकार्थवाचिन इति॥ तच्चेदं

लक्षणइत्युद्दिश्यसधर्मइतिस्वरूपवचनव्यक्तिः॥ तत्रचोदनाप्रमाणकत्वस्यधर्म३

बा०ल०प्र० धर्मलक्षणद्वारासामान्यतोधर्मस्वरूपोऽप्यर्थमपि।तच्चेदमर्थद्वयंवचनव्यक्तिद्वयतएकेनापिस्व
३ त्रेणोच्यते।तत्रान्तराशास्त्रीश्चान्तरार्थौ।तत्रयोधर्मइत्युद्दिश्यसचोदनालक्षणश्चोदनाप्रमाणा
कइतिप्रमाणवचनव्यक्तिः४। यश्चोदनालक्षणत्वान्निषेधेपिचप्रवर्तनाविषयत्वेनैवविधेयेनि
वर्तनाविषयत्वेनचोदनालक्षणत्वादतिव्याप्तिंवारयितुमर्थइत्यनर्थसाधनत्वाभावोपिविशेषणां
श्येनयागव्यावृत्त्यर्थंतदितिभाष्ये।तस्यहिफलंहिंसेति॥ तत्रोत्तरस्यांतावन्नैवपर्यवसानंआद्यायां
तुद्वौनियमौविवक्षितौ।योधर्मस्तत्रचोदनैवप्रमाणमित्येकः४ प्रत्यक्षानुमानवृद्धवाक्यादिव्यावृत्त्य
र्थः।योधर्मस्तत्रचोदनाप्रमाणमेवेत्यपरोनास्तिकाभिमतवेदाप्रामाण्यनिरासार्थः४॥ इतिचोदना
सूत्रार्थः४। तत्रप्रथमनियममफलमुपपादयितुंप्रत्यक्षस्यत्रैकाल्यसंप्रयोगेपुरुषस्येन्द्रियाणांबुद्धिजन्म एम०
तत्प्रत्यक्षमनिमित्तंविद्यमानोपलम्भनत्वादिति।तत्रअसाप्रत्यक्षमात्रस्याप्रामाण्यमुं[illegible]मर्थादिति ३

कौ०१

रेषां। तदुक्तं भाष्ये। प्रत्यक्षपूर्वकत्वाच्चानुमानोपमानार्थापत्तीनामप्यकारणत्वमिति। तत एव चबुद्धा
दिप्रत्यक्षवचननिराक्रियापि सिद्धेति च। अत्र सर्वज्ञनिरासः प्रत्यक्षनिरासायैवेति॥ इति प्रत्यक्षसू
त्रे समासं॥ द्वितीयनियमसाधनार्थमौत्पत्तिकसूत्रं। औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमु
पदेशोऽव्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति। अत्र यस्य च दुष्टं करणं य
त्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्ययः इति भाष्योक्तकारणदोषज्ञानस्याप्रामाण्यहेतोरभा
वः पंचपदेनाद्यावयवेनोक्तः। भाष्योक्तद्वितीयाप्रामाण्यहेतोरभावः अव्यतिरेकश्चेत्यनेन। तदुक्तं
औत्पत्तिकगिरा दोषः कारणस्य निवार्यते· अबाधोऽव्यतिरेकेणेति। तत्र शब्दस्यौत्पत्तिको नित्यः
अर्थश्च जात्यात्मा संबंधश्चासंकेतरूपः सामर्थ्यात्मेत्याद्यावयवार्थः॥ उपदेशो विधिस्तस्य धर्मे
स्यज्ञायतेऽनेनेति ज्ञानं ज्ञापकं इत्यनेनाज्ञापकत्वरूपस्याप्रामाण्यस्याभाव उक्तः॥ तदुक्तं। अ

बा॰ल॰प्र॰ प्रामाण्यं त्रिधाभिन्नं मिथ्यात्वाज्ञानसंशयैरिति। तथा। विधावनाश्रिते साध्ये॰ पुरुषार्थो न लभ्यते। स्व
४ त स्वर्गादि बाधेन धात्वर्थे॰ साध्यतां व्रजेत्॥ विधौ तु न मतिक्रमः स्वर्गादेः साध्यतेष्यते। तस्माद्ध्वनस्य
धर्मत्वमेवं सति चलमतमिति। अर्थे तु पलब्धे इत्यनेन तु अनुवादकत्वं निरस्तं॥ अनपे त्वादित्यनेन क्ष
च प्रामाण्यस्य स्वतस्त्वं कारणगुणसंवादार्थक्रियाज्ञानानधीनत्वरूपमुक्तं। प्रामाण्यं लक्षयन्यथात्व
न्ति रूपं विषयधर्मः यैं मित्तौ ज्ञाने प्रमाणत्वं हि व्यपदेशो भवति॰ तच्च स्वतो गृह्यते ज्ञानेनैव विषयी
क्रियते घटादीवं अप्रामाण्यं त्वर्थान्यथात्वं बाधकज्ञानं कारणदोषज्ञानं विसंवादज्ञानैर्गृह्यते इ
रू तिपरतः तथा नैवं स्वत्वावयवेन लौकिकवाक्येवं ज्ञानहेतुनिश्चयापेक्षत्वं प्रामाण्यप्रतिज्ञाया एम०
वेदे तु वक्तुरभावेन तदनपेक्षत्वादेव तदभावाद् यथार्थत्वमुक्तं। तदेतदुभयमनपेक्षत्वादिति स्वा ४
वयवोक्तत्वान्न व्याख्यानावसरो वाच्यमप्यनागतावेक्षणेन वक्ष्यमाणत्वात्यै व बोद्धनास्त्वत्र एव वार्तिक

चो॰

कृतोक्तं॥ औत्पत्तिकस्त्वत्र एव च भाष्ये निरालंबनवादनिरासेन वाह्यार्थसद्भाव उक्तः॥ ततश्चोदनाया
स्तदर्थस्य धर्मस्य तत्फलस्य स्वर्गादेश्च सत्त्वे धर्मप्रामाण्यं प्रयुक्तं नान्यथेति। एवं महायानिकसंमतक्षण
वाददूषणमपि। इयांस्तु तन्मतयोर्भेदः॥ निरालंबनवादे वाह्यो विषयोपि नास्ति नीलाद्याकाराश्चापि न
संविद्गताः इति। अत एव तन्निरासावसरे तन्मततास्यर्थमनूदितमाचार्यैः स्वच्छस्य ज्ञानरूपस्य न हि भे
दः स्वतोस्ति इति॥ क्षणवादमते तु संविद्गता नीलाद्याकाराः संतीति। एवं सिद्धे वादार्थे यन्माध्यमिके क्ष
णमर्थाभावादेव ज्ञानमपि नास्तीति तदपि हेतुनिरासादेव निरस्तं॥ एवं स्फोटनिरासोप्यत्र सूत्रे चोदना
या धर्मप्रामाण्यसिद्ध्यर्थमेव। बुद्ध्यादिमान्हि धर्मश्चोदनाप्रमेयः॥ बुद्धश्च पदादिधर्मः॥ पदार्थसत्त्वे क
थं प्रमीयेत। एवं पदार्थस्यापलेपि तदाश्रितस्य हतं तत्प्रसंगादि। तदुक्तं स्फोटनिरासस्य नै[illegible]त्यशंकाऽ ५५
र्वमाचार्यैः॥ वर्णातिरेकः प्रतिषिध्यमानः पदे स्वमेदं फलमादधातीति॥ कार्याणि वाक्यान्यथवाश्रया

बाल·प्र· णिसत्यानिकर्तृकृतएषयत्नइति। अनेनैवपर्यायविधांतरेणापिधर्मप्रमितिसिद्धिरस्यफलंश्रेयःसा
५ धनधर्मप्रमितिर्हिस्वर्गादिश्रेयस्तत्साधनयागादिपदपदार्थयोर्[illegible]त्वेनस्यादिति। अस्मिन्नेवचस्त्
त्रेअनित्यसंयुक्तिशब्दार्थत्वेवेदाप्रामाण्यापत्तेस्तत्प्रामाण्यप्रतिष्ठापयिषयानित्याकृतिःपदार्थस्
5 तास्थाप्यते। आकृतिवादेन। आकृतिश्चमीमांसकानांजातिः। जातिमेवाकृतिंप्राहुर्व्यक्तिराक्रियते
ययेतिवार्त्तिककारः॥ तस्याश्चसंयोगतत्त्वाभिमततावस्तुरूपतच्छान्यापोहिरूपत्वेपुनर्वेदाप्रामाण्यापत्तेर्भा
वरूपतोपपादितापोहवादेन। ततोवनवादेवनादिवमरमाप्यवादिपुंजात्मकएवावयवीनार्थान्तर
मित्याशंकातस्याप्रमतस्सत्वेनव्यवहारानुपयोगित्वात्संगतिग्रहासंभवेनतन्मूलकवेदाप्रामाण्य घ
वहेतितत्प्रामाण्यसिध्यर्थमेववनादिदृष्टांतवैषम्योपपादनेननिरस्ता। ततःपदपदार्थसंबंधस्येश्वर राम·
कृतसंकेतात्मकत्वेपिवेदाप्रामाण्यापत्तेस्तत्प्रामाण्यायैवेश्वरनिरासःसंबंधास्येपपरिहारेण। ततो ५

प॰ प्रत्यक्षस्य चानिमित्तं विद्यमानोपलंभनत्वादित्यवयवेनानंतरफलानुपलब्धाश्चित्रादिचोदना
क्षेपः कृतः सपरिहृतः। ततो यत्तेनैव प्रत्यक्षस्य त्वावयवेन सएषयज्ञायुधीश्चात्माऽंजसा स्वर्गलोकंया
तीत्यादिचोदनानांयज्ञायुधवतः शरीरस्य स्वर्गगमनासंभवद्रूपप्रमाणविरोधात्तत्सामान्याच्चाग्निहो
त्रादिचोदनानांप्रामाण्याक्षेपः कृतस्तत्परिहारः आत्मसाधनेनात्मवादे कृतः॥ तदेतदुभयमप्यव्य
तिरेकश्चेत्यवयवेनैवोक्तमिति॥ तदेवंषोडशाप्यर्थाः सूत्रेऽौत्पत्तिकादिके। प्रामाण्यस्य प्रतिष्ठार्थं चोद
नायानिरूपिताः॥ इत्यौत्पत्तिकसूत्रं समाप्तं॥ ॥कर्मैकेतत्रदर्शनादित्यधिकरणेचवेदप्रामाण्यप्रसिद्ध्य
र्थमौत्पत्तिकसूत्रएवौत्पत्तिकत्वरूपनित्यत्वस्य शब्दार्थरूपोभयविशेषणाविशिष्टे संबंधेऽन्वयाद्विशे।
षणीभूतशब्दनित्यत्वमप्यर्थात्प्रतिज्ञातमेवास्मिन्प्रसमाधीयते॥ तदिदमष्टादशसूत्रकं शब्दाधिकर
णंनाम॥ ततस्तद्भूताधिकरणेन सूत्रत्रयपर्यंतेन कारणासंभवाद्वेदमप्रमित्यशक्तिचोदनानामाशं

बाल॰प्र॰ स्यपदार्थकरणत्वप्रतिपादनेन चोदनाप्रामाण्यमेवोपपादितं॥ ततो वेदांश्चैकैकसंनिकर्षपुरुषा
६ त्मा इति षष्ठसूत्रेण वेदाधिकरणेन रघुवंशादिवत्पौरुषेयत्वचोदनानामाशंक्य निरस्तं। तदेवं कृ
त्स्नेनाप्याद्याध्यायाद्यपादेन चोदनाप्रामाण्यमेव द्वितीयसूत्रप्रतिज्ञातं साधितं॥ तदुक्तं। इति
प्रमाणत्वमिदं प्रसिद्धं युक्त्येह धर्मं प्रति चोदनायाः अतः परं तु प्रविभज्य वेदं त्रेधा ततो वक्ष्यति त
योऽर्थ इति॥ इति श्रीमदनन्तदेवाख्यप्रमाणपारावारपारीणाग्रणीमीमांद्वैतसाम्राज्यधुरंधरश्रीम सा
द्नारायणात्मजभट्टशंकरकृते मीमांसासारसंग्रहे बालप्रकाशे प्रथमपादार्थानुक्रमणसंक्षेपः॥
अतः परमधिकरणरचना भाष्यवार्तिकशास्त्रदीपिकादिग्रंथेषु स्फुटैव। केचित्तु मीमांसकसिद्धां
ताः शास्त्रे तत्र तत्र विप्रकीर्णा नातिस्फुटाश्च बालबुभुत्सार्थमुद्धृत्योच्यंते। तत्र प्रमाणं तावत् मीमां रस॰
सकानां विभक्तविभागेनानेकविधं॥ तथा हि। प्रत्यक्षमनुमानं शाब्दं उपमानमर्थापत्तिरभाव इति ष ६

द। तत्र प्रत्यक्षं षड्विधं चाक्षुषादिभेदात्॥ अनुमानं द्विविधं। सामान्यतो दृष्टं विशेषतो दृष्टं च॥ द्विविध
मपि पुनर्द्विविधं स्वार्थं परार्थं च॥ केवलान्वयि केवलव्यतिरेकि भेदौ तु नेष्टौ। लिंगिज्ञाने च तद्धात्स्यात् त्रिरू
पाल्लिंगतो न तदिति अनुमाने त्रैरूप्यवर्जितस्य लिंगत्वासंभवो [redacted]त्तेः॥ परार्थानुमानवाक्यस्य च तार्किका
णामिव न पंचावयवाः। किंतु त्रय एव। तदुक्तम्: तत्रोपनयं केचिद्द्वयमन्ये वयं त्रयम्: उदाहरणपर्यंतं ६
श्रा यद्वोदाहरणादिकमिति॥ मतं [redacted]नुमानोपमानाभावाख्यानि चत्वारि लौकिकान्येव। अर्थापत्तिर्द्वि।
धा। दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च॥ उपमानापि द्विविधा लौकिकी वैदिकी च॥ शब्दोपि द्विविधो लौकिको
वैदिकश्च। वैदिकोपि द्विविधः उप[redacted]पदेशोतिदेशश्च। उपदेशोपि द्विविधः विधिर्निषेधश्च। विधिनिषे
धभेदान्त्वाम्नायः॥ पुनरुपदेशोनेकविधः। शब्दांतरमभ्यासः संख्या संज्ञा गुणः प्रकरणांतरं चेति द्वैतो
यकानि कर्मभेदकानि षट् श्रुतिलिंगवाक्यप्रकरणक्रमः समाख्या चेति तानि यानि विनियोजकानि षट्

बाल॰ प्र॰ ८ श्रुतिरर्थः पाठक्रमः स्थानक्रमो मुख्यक्रमः प्रवृत्तिक्रमश्चेति पांचमिकानि क्रमप्रमाणानि षट्। श्रु
मन्त्रस्य विधिरभावविधिर्विकारः। स्वशब्दो निषेधानुवादश्चेति नावमिकानि कार्यापत्तिप्रमाणानि पंचेति
अतिदेशस्तु सप्तमे विधीयते॥ ३०॥ श्रुतिरपि चतुर्विधा। विधिः प्रतिषेधोऽभिधात्री विनियोक्त्री च॥ लिं
र्थ गं द्विविधं। शब्दसामर्थ्यमर्थसामर्थ्यं च॥ शब्दसामर्थ्यमपि द्विविधं। मंत्रस्य कर्मसमवेतार्थप्रकाशनसा
मर्थ्यमेकवाक्यत्वोपगमनसामर्थ्यं च। तच्चोत्तरं लिंगवाक्यविरोधाधिकरणे भाष्यकृता प्रवर्त्तितं सर्वं लिं
गवाध्यता च तस्योक्ता। ननु स्योनं त इत्यस्य शब्दस्य यथैवोपस्तरणाभिधानसामर्थ्यमेवमुत्तरेणैक
वाक्यतामुपगंतुं सामर्थ्यं सामर्थ्यं च लिंगमिष्यते। तस्माद्विद्यमाने वाक्ये लिंगमेव बाधितं भवती
त्वे ति॥ सत्यमेवं। एतदपि लिंगं। लिंगमपि स्वै[illegible]तदेवं तत्सराकं विप्रकृष्टार्थमेव भवति॥ लिंगादेकवाक्य एम॰
ता। तस्मादभिधानसामर्थ्यात्। ततः श्रुत्यर्थ इति विप्रकृष्टार्थ इति विप्रकृष्टार्थतेति ग्रंथेन। वाक्यमपि ८

द्विविधं। महावाक्यमवांतरवाक्यं च।। तदुक्तं। स्वार्थबोधे समाप्तानामंगांगित्वाद्यपेक्षया। वाक्यानामेकवा
क्यत्वं पुनः संहत्य जायत इति। तत्राद्यं प्रयोगविधिरूपं निःसानुमेयमेव। कल्पितांगवाक्यैकवाक्यताको
हि प्रधानविधिरेव प्रयोगविधिरिति। द्वितीयं तु समिधो यजति दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्या ज
दि। अवांतरवाक्यमपि द्विविधं विधिर्मंत्रश्च। अर्थवादस्तु तन्मर्याभावेऽपि स्तुतिलक्षकवाक्यार्थप्रतिपाद
कत्वमात्रेणार्थवत्त्वं परिकल्प्यते। प्रकरणमपि द्विविधं महाप्रकरणमवांतरप्रकरणं च।। तत्राद्यं प्रधा
नस्य। द्वितीयं प्रधानस्यांगस्य वा तथाद्यं प्रकृतेर्विकृतेश्च। एवं द्वितीयमपि। तत्र प्रकृतेरसंदंशोद्भूतिकं
यथा दर्शपूर्णमासादेः। विकृतेर्महाप्रकरणं तु संदंशेनापि भवत्यसंदंशेनापि। तत्राद्यं यथा राजसूये
राजसूयस्यापह्योना □ उत्सनाति राजसूयेनेजानः सर्वमायुरेतीति संदंशेनोद्भूतं तत्क्रमप्रकरणं बलाब
लाधिकरणे शास्त्रदीपिकायामुक्तं।। असंदंशेनापि विकृतेर्महाप्रकरणं यथा। यत्र विकृतौ प्राकृतक्रि

बाल०प्र०

८

यानुवादेन किंचिद्विहितं तत्तत्प्रकरणेन गम्यते॥ यथा प्रयाजे प्रयाजे कृष्णलं जुहोतीति। अहीना
त्मक द्वादशाहे द्वादशाही स्तु द्वादशोपसद इति द्वादशत्वं तद्गतं कृतिलिंगाधिकरणे। इतिकर्तव्यतां
शास्त्यां येनोद्दिदेशोपसत्क्रियां। द्वादशत्वविधिस्तेन कथंभावेन गम्यत इति। अत्र च क्रियामुद्दिश्य स्नुके
विकृतौ द्वयोर्देशेन ज्ञानाप्त्यादिविधावौदुंबरो यूपो भवतीत्यादौ न प्रकरणाद्गम्यते सक्रमः। अत एवोक्तं
चित्राधिकरणेपि नावांतरक्रियायोगादृते वाक्योपकल्पितात्। गुणाद्येकथंभावैर्गृह्यन्ते प्रकृताः क्रि
या इति। न चौदुंबरवाक्ये यूपलक्षितनियोजनसंबंधो वाक्यीय इति वाच्यं। आनर्थक्यपरिहारस्य संनिधि
नैव सिद्धेः। यूपपरिच्छेदिकायाश्चौदुंबरजातेरार्थापत्तिकयोजनान्वयात्। अन्यथा वषातादेरपि ब्रीहिल
क्षितयागान्वयस्य वाक्यीयत्वापत्तेः। यत्र तु प्रमाणांतरात्क्रियान्वयालाभस्तत्रैव लक्षितक्रियान्वयस्या एप्र०
वहितविधित्वमाप्यते परामृष्याहिवाक्यमिति। एवं च वस्त्यमाणेष्ठवार्त्तिकादिग्रंथेषु प्याकृतांगानुवादेन ८

विधीयतइत्यादिषुचांगशब्दःक्रियापरएवेतिध्येयमितिसंदेशेनचविकृतेर्महाप्रकरणांगत्वस्यइवनकेवलं
सं वाचनिकविकृत्यंगत्वंदर्शनेनैवभवतिकिंतुदर्शस्यानेकविधत्वादनेकविधं।तथाहि।प्राकृतांगानुवादेनविहि
ताभ्यांसहदर्शयरसंयुक्तमपिविकृतौकृतंतदपिप्रकरणेनगम्यते।प्राकृतांगानुवादेनविहितयोः४ एवंपश्चा
तनयोःप्रकरणाग्रहणोक्तेर्मध्येचतद्विच्छेदकहेत्वभावात्तथाविकृतेः५ एवमसंयुक्तंकिंचिद्विहितंतः प त
त वेतुप्राकृतांगानुवादेनयद्विहितंतोऽसंयुक्तंप्रत्नद्विकृतिप्रकरणेनगम्यते।तथाविकृतेरनंतरमसंयुक्तं
किंचिद्विधायप्राकृतांगानुवादेनकस्मिंश्चिद्विहितेएवमसंयुक्ते।प्रकरणेनगम्यते।तद्विदंभेदत्रयंवर्त्ता
वत्वाधिकरणवार्त्तिकेउक्तंयस्मात्तुविकृतौप्राकृतंकिंचिदंगंसकीर्त्तितस्यपरत्वात्स्वरत्वाद्धावैकृतमंगमा
म्नायतेतत्रकथंभावग्रहीतांग[illegible]मध्यवर्त्तित्वात्प्रकरणपाठोविहायतइति।तदेतद्वार्त्तिकंसोमेश्वरे
णानंतरभेदत्रयपरत्वेनयोजितं।तथाविकृतेः एवमसंयुक्तंकिंचिद्विहितंतः एवंतुविकृत्यनुवादेन

त९

बाल०प्र० यदिविहितंततोसंयुक्तंयत्तद्विकृतिप्रकरणेनगरस्यते। तथाविकृते रनं तत्र संयुक्तं किंचिद्विधायविकृ
२ त्यनुवादेनकस्मिंश्चिद्विहितेतत्सर्वंमसंयुक्तंप्रकरणेनगरस्यते॥ तदिदं भेदद्वयं विकृत्यनुवादेनविहित
9 स्यप्रकरणग्राह्यतोक्तेवार्थादुक्तंभवति॥ अस्य च भेदद्वयस्य पूर्वोक्तस्य च भेदत्रयस्योदाहरणानि
मृग्याणि। तथासांग्रहणी विधाय तदंगप्राकृतपरिधिपरिधाने ध्रुवोसीत्यादीन्मंत्रान्वैकृतान्वि
धायामनमस्यामनस्यादेवा इति त्रय आहुतीर्जुहोति सामनहोमाश्च संयुक्ता विहिता ४। ततस्तेषाय
त्प्रयाजानांपुरस्ताज्जुहुयाद्धिरण्मानं संजातानां दध्याम्ब्रदनुयाजानां परस्तात्स्वर्गलोकमकामेन्म
ध्येजुहोति मध्यत एव सजातानामात्मन्धत्त इति प्रयाजानुयाजैः ४ सहक्रमो विहितः तेन प्राकृतांग
संबंधित्वेन विधीनां सांग्रहणीप्रकरणादृष्टत्रेणामनहोमा ४ प्रकरणेन गरस्यंते। तेरेतच्चतुर्थतंत्रसा एम०
रे फलवद्धोमहेतुत्वादितरस्य प्रधानस्यादिस्यधिकरणे उक्तं। माहेंद्रस्य स्तोत्रं प्रसभिषिच्यत इत्यस्य २

नु अभिषेकादेरभिषेचनीयप्राकृताङ्गसंबन्धित्वेन विधानेपि न तेन प्रकरणमनुवर्त्तेत तन्मध्यविहितम
भिषेकादिरारभ्यत इति संभवति तन्मध्येभिषेकादिविध्यभावादिति न तत्सर्वाधिकरणेभिहितमिति॥ अत
एव मिश्रा अपि न्यायरत्नमालायां मनहोमानां प्रकरणाद्याह्यतामाहुः। विकृतिष्वपि यत्प्राकृताङ्ग
मध्ये परिगतं यथा मनहोमादि तस्य प्रकरणेन ग्रहणमिति ग्रंथेन॥ महासोमे स्वरस्तु बलाबलाधिकरणे
क्रमत्वे सत्यपि संग्रहणपादे तिष्ठत्व आग्नेय होतीत्यादिभिरेकवाक्यत्वोपपत्तेरिति ग्रंथेन क्रमादेवा
मनहोमानामंगतामाह तदपि शब्दादस्पष्टत्वाद मात्रमिति ज्ञेयं। यदपि मिश्रैः शास्त्रदीपिका
यां चतुर्थे फलवद्धोमहेतुत्वादिसत्रसंनिधियात्स्वत्वमुक्तं तदप्यस्पष्टत्वाद मात्रं। अत एव तंत्ररत्ने
प्रकरणाद्यात्वतामुक्त्वा संनिधिनापि तदधिकरणमिद्धिरुक्ता। तदेवं यत्र प्राकृताङ्गानुवादेन ह्यादशो
पसत्त्ववद्विधिरुक्तरूपः समविधः संदंशो वा तत्रैव विकृतौ प्रकरणं विनियोजकमन्यत्र संनिधिरे

वेत्ति सिद्धं। एवं प्रधानस्य महाप्रकरणं प्रकृतेर संदंशोद्भूतिकं विकृतेस्तु संदंशोद्भूतिकमपि निरूपितं। अवांतरप्रकरणं तु संदंशोद्भूतिकमेव तच्च प्रकृतेर्नास्त्येव प्रकृत्यंगस्य तु प्रयाजानामभिक्रमाधिकरणे उक्तं॥ विकृतेस्त्ववांतरप्रकरणं संदंशोद्भूतिकं समममेषणायनाधिकरणे वरुणप्रघासानामुक्तं। तत्र हि उपात्रवयंतीति वरुणप्रघासावांतरप्रकरणाधीतमपि न वैश्वदेव उत्तरवेदिमुपवपंति न सुनासीरीय इति पर्युदासैकवाक्यतावलादेवावांतरप्रकरणं वाधित्वा चातुर्मास्यानामेवात्रेति वादरस्युक्तं। इति प्रकरणनिरूपणं॥ ॥ क्रमोपि द्विविधः पाठसादेश्यमनुष्ठानसादेश्यं च। पाठसादेश्यमपि द्विविधं यथासंख्यपाठः संनिधिपाठश्च। समाख्यापि द्विविधा लौकिकी वैदिकी च। पुनरपि समाख्या द्विविधा सामान्यसमाख्या विशेषसमाख्या च॥ विधिरपि द्विविधः प्रसक्तः कल्प्यश्च॥ प्रसक्तोप्यनेकधावस्थिते। कल्प्योपि नानास्मृतिकल्प्यश्चाचारकल्प्यो विधिकल्प्योऽर्थवादकल्प्यो मंत्रकल्प्यश्च॥ तत्र

विधिकल्पोयथाविशेषणाविधिः अर्थवादकल्पस्तुद्विविधः स्वतंत्रार्थवादकल्पोविध्यंतरशेषा-
र्थवादकल्पश्च॥ आद्योपित्रिविधः फलार्थवादकल्पः सिद्धवत्कीर्तनार्थवादकल्पः। उपाख्याना-
र्थवादकल्पश्च। अंत्योपिद्विविधः। एककर्तृकोपाख्यानरूपपरकृतिकल्पोनैककर्तृकोपाख्यानरूपपु- क
कल्प राकल्पश्चतत्रफलार्थवादकल्पोयथायस्यपर्णमयीजुहूर्भवतिनसपापंश्लोकंशृणोतीति। सि-
द्धवत्कीर्तनार्थवादकल्पोयथात्रीणिहवैयज्ञस्योदराणिगायत्रीबृहत्यनुष्टुप्च अत्रह्येवावपंत छु१
त एवोद्वपंतीति॥ परकृतिकल्पोयथातामग्नामेतमग्नीषोमीयमेकादशकपालंपूर्णमासे प्रायच्छ- श्रा
दिति। इंद्रस्येदमुपाख्यानंतस्मादिंद्रोबिभेदित्युपक्रमात्तस्यप्रायच्छदितिक्रियायांकर्तृत्वेनानु-
षंगात्। पुराकल्पकल्पोयथा। तावब्रूतामग्नीषोमावाज्यस्यैवनावुपांशुपौर्णमास्यांयजन्निति।
विध्यंतरशेषार्थवादकल्पोयथाउपरिहिदेवेभ्योधारयतीति॥ मंत्रकल्पोद्विविधः मंत्रगता

बाल० प्र ख्यातस्यैवल्लेदूलकल्पनात्। विधिप्रकृत्वा कांतरकल्पना वा। तत्राद्यो यथा वसंततायां कपिंजलानाल
११ भत इति। द्वितीयो यथोपांश्वयाजादौ याज्यानुवाक्यास्वृक्त्वाकादि मंत्रकल्पो देवतादिविधिः यथा वा
उच्चारि विदक्षिणावंतो ऽस्यपर्ये अश्वदाः सहते सूर्येणोऽस्वदानफलविधिः। तदेतद्दूरोधाधिकर
णाभंगटीकाव्याख्यानांते तेतेश्वरेणोक्तं अथ प्रसक्तविधिभेदाः प्रायश उच्यंते तेने केचित्स्मार्ता अपि
संभवंत प्रसक्तभेदप्रदर्शनेनैवोक्तप्राया इति नष्टथगुच्यंते केचित्स्मार्ता एव संभवंतीति तत्र तत्रैव
स्यंते पुनर्विधिर्द्विविधः अर्थकर्मविधिर्गुणकर्मविधिश्च। गुणकर्मविधिरपि त्रिविधः अदृष्टार्थो
दृष्टार्थ उभयार्थश्च। उत्तरो द्विविधो प्रतिपत्तिरूपा वतथारूपो वा॥ तत्र दृष्टार्थो प्रतिपत्तिर्यथा वात्साले
कृष्णाविषाणां प्रास्यतीति। उभयार्थो प्रतिपत्तिर्यथा अयि कर्मस्विष्टकृदादि। अप्रतिपत्तिरूपं दृष्टा। रम०
र्थं गुणकर्म यथा व्रीहीन्नवहंतीति। अप्रतिपत्तिरूपमुभयार्थं गुणकर्म यथा पशुपमरोडाशयागाद्या ११

अपिकर्म।पुनरपिविधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिश्च।तत्रो
त्पत्त्यादिविधिश्चतुर्विधोऽपिप्रत्येकंद्विविधः क्रत्वर्थः पुरुषार्थश्च।तत्रक्रत्वर्थ उत्पत्तिविधिर्यथासमिधो
यजतीत्यादिः।।पुरुषार्थ उत्पत्तिविधिर्यथाग्निहोत्रंजुहोतीत्यादिः।क्रत्वर्थोविनियोगविधिर्यथाव्री
हीन्प्रोक्षतीत्यादिः।।पुरुषार्थोविनियोगविधिर्यथाद्रव्यार्जनविधिः।क्रत्वर्थः प्रयोगविधिर्यथार
मणीयादिविधिरतिदेशिककालदेशाद्येकवाक्यतापन्नः।पुरुषार्थः प्रयोगविधिरपिद्विधः अवा
न्तरप्रयोगविधिर्महाप्रयोगविधिश्च।।तत्राद्योयथापौर्णमास्यांपौर्णमास्यायजेतअमावास्याया
ममावास्ययायजेतेत्यादिः।। अत्रचफलवाक्यैकरणत्वेनैवप्रयोगावच्छेदेनकर्मणोविधेयत्वान्नछ
करणत्वात्प्रसंगत्यादित्सममोन्सामपिविवक्षितंकालस्यापिविधेयत्वान्नरेकत्वमपिविवक्षितं।
विधेयत्वमेवववविवक्षावीजंनोपादेयत्वंतद्विशेषणत्वंवेतिनन्दीकायामत्रंनोपादेयत्वमेषेकंविवक्षा

कारणं मतं। विशेषणाविवक्षायां कारणं हि महद्विधिरिति। एकं मुख्यं। अतस्त्रिकस्य त्रिकस्यैकप्रयो
गान्नास्ति द्विरेकादशोक्तापौर्णमास्यधिकरणवार्त्तिकोपपादितोपपन्ना। महाप्रयोगविधिर्यथा सम
दर्शपूर्णमासाभ्यां यजेतेति। अत्रापि षण्णामेकप्रयोगता साधकं सर्वोक्तो विलोपिन्यायस्तुल्यः।
तस्य फलमेकं संकल्पं कर्तृत्वयोधिकारविधिरपि हि विधेः। नैमित्तिकं सन्देशनिर्वाणार्थो नै
मित्तिकं सन्दोषनिर्वाणार्थोपि वा। तत्राद्योपप्याभिन्नेज्यु होतीति। एतदुदाहरणं शास्त्रदीपिकायां
द्वादशसमुच्चयस्त्वदोषनिर्वाणार्थे — स्त्रोक्तः तत्राविध्यतिक्रमे हि दोषः। अंगनाशे च विध्यतिक्रम
कपालं चासादनोपात्तमंगां तेन कपालामेदंगं भेषणादोषान्तान्निर्घातार्थ एवायं होमः। अत एव षष्ठे एम०
अथ समवायात्प्रायश्चित्तमेकदेशेऽपत्यत्र एकदेशभेदस्यैवायं होम इति पूर्वपक्षे हेतुहोमोयं भिन्नसंस्कारो १२
भेददोषनिबर्हणादित्युक्तः। न च भेददोषो नेति सिद्धान्तहेतुरुक्तः। किं तु हेत्वंतरमेव नित्यसंयोगविरोधः

एतदस्याभिः शास्त्रदीपिकाप्रकाशेउक्तं। तस्माद्दोषनिघातार्थं नैमित्तिकोदाहरणमश्वप्रतिग्रहेष्टिर्जप्य
मानमंत्रोक्तिश्चेति द्वितीयो द्विविधः विहिताभिक्रमनिमित्तको निषिद्धाचरणनिमित्तकश्च तत्राद्यो यथा
यष्टव्योपज्ञश्चाग्निर्म्रियाद्वः स्याहेनिगाहयेसर्जुहुयादित्यादिः ऋग्वेदादिनिषिद्धाचरणोपस्पष्टत्वे द्वि
तीयोदाहरणमपीदमेव पुरुषार्थाधिकारविधिस्त्रिविधः काम्यो नैमित्तिकः संवलितश्च॥ काम्योपि द्वि
विधः कर्मफलसंबंधपरः गुणफलसंबंधपरश्च॥ तत्राद्यो यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्या
दिः॥ द्वितीयो यथा दध्नेंद्रियकामस्य जुहुयादित्यादिः। नैमित्तिकोपि द्विविधः नियतनिमित्तकः अ
नियतनिमित्तकश्च। तत्राद्यो यथा। यावज्जीवमग्निहोत्रं जुहोतीत्यादिः। द्वितीयो यथा। यस्याहिताग्नेर
ग्निर्गृहान्दहेत्सामवतेग्नये पुरोडाशमष्टाकपालं निर्वपेदित्यादिः। तृतीयो द्विविधः निमित्तजन्यदोष
नाशफलसंवलितः इतरफलसंवलितश्च। तत्राद्योपि द्विविधः विहिताभिक्रमनिमित्तको निषिद्धाच

वा० ल० प्र० रणनिमित्तकश्च। तत्राद्यो यथा यो मावास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृतेऽष्टाकपालं निर्वपे

१३ दित्यादि४॥ निषिद्धाचरणनिमित्तको यथा। यद्येकं रूपमुपस्पृशेदेष ते वायो इति ब्रूयादित्यादि४। इ

तरफलसंवलितो यथा वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इत्यारभ्य यस्मिं जात एतामिष्टिं निर्व

13 पति पूत एव स तेजस्व्यन्नाद इंद्रियावी पशुमान्भवतीत्यंतो जातेष्टिविधि४॥ पुनरपि विधिरेकादशवि

ध४। सामान्यविधिर्विशेषविधिः प्रतिप्रसवविधिरभ्यनुज्ञाविधिरुपसंहारविधिर्व्यवस्थाविधिः प

र्युदासविधिरभावे विधिः साधारणविधिरुत्कर्षविधिरपकर्षविधिश्चेति। इह चाभ्यनुज्ञाविधिः प्र

तिप्रसवभिन्नोऽप्यस्ति यथा षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव वि

शुद्धाच्च प्रतिग्रह इति। तथा प्रतिप्रसवरूपोऽप्यस्ति क्रीतराजको भोज्यान्न इति। तथा प्रतिप्रसवोऽप्यभ्य एप्र०

नुज्ञाविधिभिन्नोऽप्यस्ति एषा प्रपिष्टभागा इति। अतस्तौ पृथगुपात्तौ। यद्यपि चोपसंहारविधिर्विशे १३

षविधिभेद एव प्रतिप्रसवादिविधेरपि च सामान्यविधिविशेषविधिभेदौ संभवतः तथापि भेदं विनापि
सामान्यसंभवा — बलीवर्दन्यायेन पृथगुद्देशः। एकादशविधोऽपि च विधिः पुनर्द्विविधः क्रत्वर्थः पु
रुषार्थश्च। तत्र क्रत्वर्थः सामान्यविधिर्यथा यदाहवनीये जुहोतीति। पुरुषार्थः सामान्यविधिर्यथा पु
त्रकामेष्टिः क्रत्वर्थो विशेषविधिर्यथा पदे जुहोतीति। पुरुषार्थो विशेषविधिर्यथा यः कामयेत वीरम
प्राजापतेनेति स चतुर्होतारं जु — पादिति। वीरपुत्रकामनायादि चतुर्होतृहोमेन बाधास्तत्र सामान्य
कामस्यैव पुत्रेष्टिः। क्रत्वर्थः प्रतिप्रसवविधिर्यथा। इषामपिष्टभागति। पुरुषार्थः सयथाः ग्रहणोस्त
तकेऽपि श्राद्धविधिः। स्मार्तः पुनः प्रतिप्रसवविधिः पंचविधः। लुप्तार्थप्रतिप्रसवः। निषिद्धप्रतिप्र
सवः पर्युदस्तप्रतिप्रसवः। नियमविधिना फलतो व्यावर्तितयत्नाद्विषयः प्रतिप्रसवः। परिसंख्या
व्यावर्तितयत्नाद्विषयश्चेति। तत्राद्यो यथा। इषामपिष्टभाग इति तार्तीयः। दाशमिकश्च लुप्तलवोऽयं

बाल०प्र· तेऽपपयतीति॥ द्वितीयो यथोदाहृत ८ स्मार्ते ८ ग्रहणे सूतकेपि श्राद्धविधिः। स्मार्तकर्मपरित्यागो ग्र
१५ होरन्यत्र सूतक इतिः। ग्रहोरन्यत्र निमित्ते यत्स्मार्तकर्म श्राद्धादि तस्य सूतके परित्यागो न ग्रहणनिमि
त्तकस्मार्तस्येत्यर्थ ८। श्रौतोपि न हिंस्यात्सर्वा भूतानीति निषिद्धस्य प्रतिप्रसवोऽग्नीषोमीयं पशुमाल
भेत। वायव्यं श्वेतमालभेतेति पर्युदस्तप्रतिप्रसवो यथा। महस्तोमे स्वरसामतेन प्रथमयज्ञे प्रष्ठं ज्यादि
सस्य पर्युदासत्वात्तस्य प्रतिप्रसवो यथा॥ महस्तोमे ऽग्निष्टोमे प्रवृणक्तीति॥ नियमविधिव्यावर्तितप्रति
प्रसवो यथा। हतैरेवार्त्विज्यं कर्तव्यमिति वरणनियमे नाहूत आहूतो महसामहत ८ सामिधेनीरन्वाह
ति होतुरवृतस्यापि प्रतिप्रसव ८। परिसंख्यावर्ति। तप्रतिप्रसवो यथा। दशमे पशोरेकहविष्टमि
त्यत उत्तरेऽधिकरणे हृदय ८ स्याग्रेऽवद्यतीसादीपरिसंख्येति पर्यायस्त्वं भाष्यकृतो मत। महस्तोमे स्वरे राम०
रेणातु पशुसोमाधिकरणोत्तदधिकरणार्थ एवं वर्णित ८। एकादशैवैपश्वोरवदानानीति परिसंख्या १४

अतस्तेषां गान्तराणि यागेष्वावर्त्तितानीति तद्द्वारा स्विष्टकृत्स विशेषकार्ये आवर्तितानामेव। तत्रैवाङ्गेः स्वि
ष्टकृतं यजतीसंगान्तरेषु त्रयाणां प्रतिप्रसवः। फलार्थो ऽभ्यनुज्ञाविधिर्यथा॥ यदि सोमविक्रयी प्रतिवि
वदेतष्टषैतेनं वरत्राकाण्डेनावस्राणां नाशयेत् सर्वेकुटैर्धीतीति केनित्सवरेकेवधं समामनन्तो सापस्लेव
स्त्रे॥ पुरुषार्थो ऽभ्यनुज्ञाविधिर्यथा क्रीतराजको भोज्यान्न इति। पुनरभ्यनुज्ञाविधिर्द्विविधः॥ कृतो ऽप्य
प्राप्तं यत्र द्विषयः कृतोपि प्राप्तं यत्र द्विषयश्च। तत्राद्यो यथा षण्णां तु कर्मणामस्य त्रीणि कर्माणि
जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः इति। द्वितीयः पंचविधः निषिद्धविषयः पर्युदस्तविष
यो नियमप्रावर्त्तितविषयः परिसंख्याप्रावर्त्तितविषय उपसंहारप्रावर्त्तितविषयश्चेति· तत्राद्यो द्विविध
सामान्यरूपो विशेषरूपश्च। आद्यो यथा मन्त्रो नदीः सिन्तस्यान्नमश्नीयादिति निषिद्धे जीवितात्ययमा
पन्नो यो ऽन्नमत्ति यतस्ततः आकाशइव पंकेन न स पापेन लिप्यत इति। द्वितीयो यथा क्रीतराजको भोज्या

वाल॰ प्र॰ न्त इति। उभयोश्च प्रयोजनमल्पदोषत्वं निर्दोषत्वं चेत्युक्तं वार्त्तिके। सामान्येनाभ्यनुज्ञानाद्विशेषस्य विशि
१५ ष्यते। विशेषोऽत्यन्तनिर्दोषः लोकदोषेतरक्रियेति॥ एवं पर्युदस्ताभ्यनुज्ञाविधिरपि द्विविधः सामान्य
रूपो विशेषरूपश्च। तत्राद्यो यथा नदीक्षितस्यान्नमश्नीयादित्यस्य पर्युदासत्वपक्षे ऽग्नीषोमीये संस्थिते
15 यजमानस्य गृहे ऽशितव्यमिति। द्वितीयो यथा ऐन्द्रेऽपि ब्राह्मणो ऽशितव्यं वपायां हुतायामिति॥ उभयो
श्च प्रयोजनं बह्वल्पफलत्वं पर्युदासविधेरित्याह भट्टसोमेश्वरः। नियमविध्यावर्त्तिताभ्यनुज्ञा यथा वि
प्रादेर्द्रव्यार्जनोपायनियमैर्व्यावर्त्तिता क्षत्रियादिवृत्तिरापद्यभ्यनुज्ञायते। अजीवंस्तु यथोक्तेन ब्राह्मणः
स्वेन कर्मणा। जीवेत्क्षत्रियधर्मेणेति॥ परिसंख्याव्यावर्त्तिताभ्यनुज्ञाविधिर्यथा धिर्यथा पंच पंचनखा भ
क्ष्या इत्यनेन व्यावर्त्तितानां मार्जारादीनामभ्यनुज्ञाविधिः प्राणात्ययरसादिः॥ उपसंहारव्यावर्त्तितवि
षयोऽभ्यनुज्ञाविधिर्यथा भवत्सर्वो ब्राह्मणो भिक्षेतेति सामान्यविधेरुपसंहारेण ब्राह्मणोऽभ्यचरेद्वै समि राम॰ १५

स्यनेनाभ्यावर्त्तितस्य सत्रिपादेरभ्युन्नतस्याविधिस्त्वानुवेराप चरेऽद्रे स्यमिति क्रत्वर्थ उपसंहारविधिर्यथाग्नेयं च
तुर्धा करोतीति। पुरुषार्थः समयाध्यसहाहादशाब्दानीति सामान्ये पूर्वयोवर्ण्णयोर्वेदाध्यापिने हत्वेति वि
शेषे उपसंह्रियते। पुनरुपसंहारो द्विविधः। उपसंहार्यस्योपसंहारविषये नियमतः प्राप्तावनियमतः
प्राप्तेवेति॥ आद्योदाहरणमनुक्रान्तमेव। द्वितीयोदाहरणं तु यजुर्युक्तं रथमध्वर्यवे ददातीति॥ दशमे हि।
प्राकाशावध्वर्युयुक्तं रथोऽप्यध्वर्युभागस्यानिवर्तक इति सर्वप्रसंक्रान्ता प्राकाशावपूर्वौ विधीयमानावु
क्तं पदध्वर्युभागं बाधेते इह तु सप्तसप्तदशकानि प्राकृतदक्षिणाबाधेन परस्परसहितान्येव दक्षिणात्वे
न विहितानि तत्र यजुर्युक्तस्यापि प्राप्तमेव दानं सत्त्वध्वर्यवे समस्मै वा दातव्यः प्राप्तो ध्वर्यावुपसंह्रियत इति
सिद्धान्तः॥ क्रत्वर्थोऽव्यवस्थाविधिर्यथा वार्त्रघ्नी पौर्णमास्यामनुच्येते वृधन्वती अमावास्यायामिति। चतु
होत्रा पौर्णमासीमभिमृशेत् संवहोत्रामावास्यामिति च॥ पुरुषार्थोऽव्यवस्थाविधिर्यथा सयाहे पार्वणौ को

वाल० प्र०
१६
16

दिष्टमवस्थाविधिः। पुनरवस्थाविधिस्त्रिविधः ऽ उभयप्राप्तावनुभयप्राप्तावन्तरप्राप्तौ चेति। आद्यो य
थाचात्र्यौ श्रीद्धध्वसे ऽ। आज्यभागक्रमे पाठाल्लिंगाच्चोभयप्राप्ते ऽ द्वितीयो यथावनुर्होतृपंचहोतृमंत्र
योः ऽ तयोः प्रकरणेनाम्नानात्। यथा वा पदग्नयेव प्रजापतये च सायं जुहोति सूर्याय च प्रजापतये च प्रा
तरिति श्रालक्षणेन देवताविधिपक्षेऽग्निसूर्ययोरप्राप्ते ऽ। तृतीयो यथा वाशिष्ठानां नाराशंसो द्वितीय ऽ प्रयाज
स्तनूनपादन्येषामिति॥ अत्र हि विधिपाठक्रमात् तनूनपादेव द्वितीय ऽ प्राप्तो न नाराशंसः ऽ तथा पारिप्ल
तरसामा सोमः ऽ स्यादैंद्रवायवाः प्रातरग्रहानद्दलीयाघरिष्ठह्रस्सामासु क्रायानिति॥ अत्रापि हि पाठत ऐंद्र
वायवाग्रतैव प्राप्ता न शुक्राग्रतेति। पुनरपि अवस्थाया ऽ द्वैविध्याद्द्विविधोऽवस्थाविधिः ऽ न्यायगम्योऽ
वस्थावाचनिकी च॥ तत्राद्यो यथा समन्तानावघातादेरग्न्योषधयोः ऽ। वाचनिकी तु अवस्था सम्प्रधातेन सम
विधस्तद्विधिः देशतोऽवस्था कालतोऽवस्था कर्तृतोऽवस्था संस्कार्यतोऽवस्था कर्मतोऽवस्था फ

एम०
१६

लतोव्यवस्थानिमित्ततोव्यवस्थेति॥ देशतोव्यवस्था यथा वहूनामपामेषु उत्तरे विहारे भूर्यरक्षोहवींष्यासाद
यति मारुतीमेव अग्निप्रस्थाता दक्षिणास्मिन्निति॥ स्मार्तमुदाहरणं यथा नर्मदोत्तरभागे तु कर्त्तव्यं सिंहयुक्का
कौ कुलीरे संस्थिते भानावुपाकुर्यात्तु दक्षिणा इति बृहस्पतिः। कालतो व्यवस्था यथा। वसंते ब्राह्मणोग्नीनाद
धीत ग्रीष्मे राजन्य४ शरदि वैश्यो वर्षासु रथकार आदधीतेति। स्मार्तमुदाहरणं यथा दिवा संध्यासु कर्णस्थ
ब्रह्मसूत्र उदङ्मुख४। कुर्यान्मूत्रं राजन्यस्यामिसावैश्यस्येति॥ तथा वार्हद्दिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्सा
धुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्येति। तथा एवं हि स्य स्वपती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादेत
भ्रूस्य मित्रं वद इति वहुभ्यो यजमानेभ्य इति। स्मार्तेन्मुदाहरणं गर्भाष्टमेब्दे कुर्वीत ब्राह्मणस्योपनायनं। ग
र्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश इति संस्कार्यतो व्यवस्था यथा। आज्यौषधसान्नाय्यधर्माणां। कर्मतो व्य
वस्था यथा। रथंतरे प्रस्तूयमाने संमीलये दृहदिति समुद्रं मनसा ध्यायेदिति। स्मार्तोदाहरणं तु बृहस्पतिः। इ

बाल॰प्र॰ ष्टिश्राद्धेक्रतुर्दक्ष४सत्योनांदीमुखेवसु४।नैमित्तिकेकालकामौकाम्येतुधुरिलोचनौपुरूरवार्द्रवौचैवपा
१८ र्वणेसमुदाहृताविसादि।मनुः।पित्र्येस्वदितमित्येवंवाच्यंगोष्ठेतुसुश्रुतं।संपन्नमित्यभ्युदयेदैवेरोचित
मित्यपीति।फलतोव्यवस्थायथाब्रह्मयेनप्रतिष्ठाकामस्यप्रणयेत्कांस्येनब्रह्मवर्चसकामस्येति॥स्मा
17 र्तोदाहरणंतु॥ब्रह्मयज्ञएवफलविशेषार्थमृग्यजु४सामाध्ययनविधिः।निमित्ततोव्यवस्थायथा।य
दिरथंतरसामासोमःस्याद्वैंद्रवायवाग्रान्ग्रहान्गृह्णीयाद्यदिबृहत्सामाशुक्राग्रानिति।स्मार्तोदाहरण
तुन्हणामकृतचूडानामशुद्धिर्नैशिकीस्मृता।निर्वृत्तचूडकानांतुत्रिरात्राच्छुद्धिरिष्यतइतिमनु४।तथान्य
तरकोटिव्यवस्थयाकोयंतरस्यार्थिकीव्यवस्थाभवतिसापिभावविषयाभावाभावविषयावेतिद्विविधा
तत्राद्यायथाआग्नेयोवैब्राह्मणोदेवतयाससोमेनेष्ट्वाग्नीषोमीयोभवतियदेवादः४पौर्णमासंहविस्तत् राम॰
र्ह्यनुनिर्वपेत्तर्हिसउभयदेवतोभवतीत्यग्नीषोमीयपुरोडाशोक्तसोमयागयुंविषयत्वेनव्यवस्था। १८

पितेर्थान्तर्भावोऽकृतसोमयागापुंविषयत्वेन व्यवस्थितो भवतीति तेर्थोद्देदं कृत्वा वेदिं रोतीस्युत्तरेषुः कृत
मं वेदकरणं पौर्णमास्यां व्यवस्थितं भवति घापथा पूर्वेद्युरमावास्यायां वेदिं करोतीसमावास्यायां पूर्वेद्यु
र्वेदिकरणं व्यवस्थापितादिदमुदाहरणद्वयं पंचमे सिद्धं तथा पूर्वे मित्यत्र पूर्वेद्युः कर्षू द्वा लक्षणस्येसत्रोत्त
रं कृत्वर्थः पर्युदासविधिर्यथा प्रयाजतिषु येयजामहं करोति नानूयाजेष्विति। पुरुषार्थः पर्युदासो यथा।
नेक्षेतोद्यन्तमादित्यमीक्षोतेस्यादिः॥ पुनः पर्युदासविधिर्द्विविधः पर्युदासस्य स्वातन्त्र्यात्परविशेषणत्वा
च्च॥ तत्राद्येनेक्षेतेत्येवोदाहार्यं। द्वितीयस्तु द्विविधः पर्युदासस्योद्देश्यविशेषणत्वाद्विधेयविशेषणत्वा
च्च। तत्रोद्देश्यविशेषणत्वेनानूयाजेष्विति उदाहार्यं। विधेयविशेषणत्वाद्यथा नार्षेयं वृणीत न होतारं वृ
णीत इति। एवं न रपि व स्पमाणा निषेधषोडशत्ववत्पर्युदासोपि षोडशविधः॥ तथाहि॥ प्रकृतौ विकृतौ प्र
कृतिविकृत्यात्मके च कर्मणि समानविधानः पर्युदासविधिर्नानूयाजेषु येयजामहमिति। अत्रं त्वाति

बाल॰ प्र॰ तिदेशिकद्वारप्रतीक्षणान्तमदश्चौवै प्रजापतिर्यज्ञेयज्ञेन्वायत्तत्र इत्यत्र वार्तिककृदकस्यद्धिकृतान्याया
१८ पवादस्यसाम्मात्। एवंप्रकृतिगता एदुपकारिपर्युदासो विकृतिगताद्युपकारिपर्युदासः अप्रकृतिविकृ
त्यात्मककर्मगता एदुपकारिपर्युदासः ४ प्रकृतिगताहृष्टार्थसंनिपातिपर्युदासः ४ प्रकृतिगतप्रतिपत्तिक
र्मसंनिपातिदृष्टार्थपर्युदासः ४ प्रकृतिगतप्रतिपत्तिपर्युदासः ४ विकृतिगतोपदिष्टस्यपूर्ववत्त्रिविध
स्यसंनिपातिनपर्युदासास्त्रयः ४॥ विकृतिगतातिदिष्टस्यपूर्ववत्त्रिविधस्यसंनिपातिनः पर्युदासाः ४ त्र
यः ४। अप्रकृतिविकृत्यात्मककर्मगतोपदिष्टसंनिपातिन ४ पूर्ववत्त्रिविधस्यपर्युदासास्त्रय इति द्वादशा
एमुदाहरणानियथासंभवंमृग्याणि कृत्वर्थोभावे विधिर्यथा लिष्टकृदर्थावत्तनाशआज्यविधिर्यथावै
कोचिदेवतामंतरितस्तस्याआहृश्चते आज्येनैता देवता ४ परिसंख्यायायजेतेति। तथा अग्न्यभावेतु विप्र राम॰
स्यपाणावेवोपपादयेदि॥ पुरुषार्थोभावे विधिर्यथा सत्त्रायामर्थविश्वजितायजेतेति। साधारणपवि १८

धिर्द्विविधः। विनियोगसाधारण्यविधिरनुष्ठानसाधारण्यविधिश्चेति। तत्राद्यो यथा। यदातिथ्यायां बर्हिस्तदु
पसदां तदग्नीषोमीयस्येति। यथा वा बर्हिषो — र्हिर्धर्माणां च वेद्या वेदिधर्माणां च विधिरंगप्रधानसाधारण्य
द्वितीयो यथा। उपदेशेनाग्नीषोमीयेतिदेशेन च सवनीयानुबन्ध्ययोरंगभूतस्य यूपस्यानुष्ठानसाधारण्य
थों दीक्षासुत्यपंक्तिनतीति अपकर्षविधिरिति। उत्कर्षविधिर्यथा। आग्निमारुतादूर्ध्वमनूयाजैश्चरंतिः स
एष औपवसथ्येहन्द्विदेवत्यः पशुरालभ्यतइत्यग्नीषोमीयस्य क्रयसंनिधा वुत्पन्नस्य। अपकर्षविधिः
साधारण्यविधिव्यतिरिक्तोऽपि यथातिष्ठंतं पशुं प्रयजंतीति पनपि सामान्यादिविध्येकारकयथासंभवं द्विवि
धं दृष्टार्थमदृष्टार्थं च।। तत्रादृष्टार्थौ सामान्यविशेषविधी यथा उदाहृतावेवाहवनीयपदविधी। दृष्टार्थौ तु
सोमफलचमसविधी। प्रतिप्रसवविधिस्तूदाहृतो द्विविधोऽप्यदृष्टार्थ एव। दृष्टार्थस्तु प्रतिप्रसवविधिर्यथा
पशुं संज्ञपयतीति। अभ्यनुज्ञाविधिस्तु सर्वोऽपि दृष्टार्थ एव न त्वदृष्टार्थोऽपीति।। उपसंहारविधिस्तु पूर्वोक्त॰

बाल० प्र० क्रत्वर्थो दृष्टार्थः । पुरुषार्थस्तु सर्वोत्मो ऽदृष्टार्थः ॥ अभ्यवस्थाविधिस्तु प्रागुक्तः सर्वोऽप्यदृष्टार्थ एव । यद्य-
१९ पि वार्त्रघ्नीवृधन्वत्सोराज्यभागदेवताभूताग्निसोमप्रकाशनार्थत्वाद्दृष्टार्थ तैर्वक्तथापि तु स्मार्थयोर्यगल-
योर्भवस्थाविधिरदृष्टार्थ एव । दृष्टार्थोऽभ्यवस्थाविधिर्यथा आर्षसंख्याशिखाभ्यवस्थाविधिस्तत्संख्यार्थप्रुक्त-
19 गोत्रज्ञानरूपदृष्टार्थ इत्युक्तं स्मृत्सधिकरणन्यायसुधायां । पर्युदासविधिस्तु प्रागुक्तो द्विविधोऽपि पुरुषार्थः
अदृष्टार्थ एव । दृष्टार्थस्तु पर्युदासो यजतिषु येयजामहं करोति नानुयाजेष्विति । अत्र च यद्यपि अनुयाज-
व्यतिरिक्तेषु संशोन दृष्टार्थस्तथाऽपि विधेयपर्ययेयजामहांशे यागप्रकाशकत्वेन दृष्टार्थत्वात्पर्युदासविधि-
र्दृष्टार्थ इत्युच्यते । अभावविधिस्तु सर्वोदाहृतयोर्मध्ये क्रत्वर्थोऽयः सदृष्टार्थः पुरुषार्थस्त्वदृष्टार्थः पुनर-
पि सामान्यादिविधेकादशकं जातिद्रव्यगुणक्रियाविषयत्वेन यथासंभवं नतु र्था । जात्यादिविषयत्वमपि । राम०
उद्देश्यांशे विधेयांशे उभयांशे चेति जात्यादिविषयमपि विधेकादशकं प्रसेकं त्रिविधमिति द्वात्रिंशदुन्न १९

रशतं भेदा भवंति। एषा दाहरणान्यन्वेष्याणि ग्रंथगौरवान्न प्रदर्शितानि॥ पुनरप्यष्टविधो विधिर्धात्व
र्थमात्रविधिः सगुणधात्वर्थविधिः किंचिदुद्दिश्य धात्वर्थविधिस्तत्रैव शिष्टधात्वर्थविधिर्धात्वर्थोद्देनाम
विधिर्धात्वर्थेनान्ययोः संबंधविधिर्धात्वर्था रक्तेन प्रत्ययेनान्ययोः संबंधविधिर्मुख्याधात्वर्थमनन्ययोरेव सं
बंधविधिश्चेति। अत्र दूषणाभूषणं द्वितीयाध्यायार्थप्रस्तावेवक्ष्यते। पुनरपि त्रिविधो विधिरपूर्वविधिर्निय
म विधिः परिसंख्याविधिश्च॥ त्रिविधोप्यसौ चतुर्विधः जातिविधिर्द्रव्यविधिर्गुणविधिः क्रियाविधिश्च॥
तत्र जातेरपूर्वविधिर्यथा खादिरं वीर्यकामस्य यूपं कुर्वीतेति॥ द्रव्यस्यापूर्वविधिर्यथा गोदोहनेन पशुकाम
स्य प्रणयेदिति। गोदोहनशब्दस्य यौगिकत्वेन द्रव्यवाचित्वात्॥ गुणस्यापूर्वविधिर्यथा यदि कामयेत वर्षु
कः पर्जन्यः स्यान्नीचैः सदो मिनुयादिति॥ क्रियापूर्वविधिर्यथाग्निहोत्रं जुहोतीति। देवताविधिर्होमाधि
करणीभूताहवनीयादिविधिश्चापूर्वविधावेवान्तर्भूतः। देवताया यागाङ्गत्वाद्दृष्टार्थत्वेपि विधेयकप्रमाण

वाल०प्र० त्वात्। आहवनीयादेरप्यधिकरणत्वेन दृष्टार्थत्वेऽपि होमविधिना नास्तिमत्तेनादृष्टार्थम्पि होत्राधिकरणवा।
२० र्तिके उक्तत्वात्। अतो दृष्टार्थत्वं नियमविधिलक्षणं दीक्षितोऽक्रमस्नानमत्वमेव।। तदेवं द्विविधोऽपूर्ववि
20 धिः पुनः सिद्धो दृष्टार्थः अदृष्टार्थश्च।। देवताविधिरपि तद्धितचतुर्थीमंत्रवर्णद्वितीयार्थवादभेदात्संचविध
ः। तत्राग्नेस्फुटः आर्थवादिकोऽर्थवादभेदेष्ववस्तते। अध्ययनविधिरप्यपूर्वविधिर्दृष्टार्थश्च।। नत्वयंनि
यमः सत्वर्थज्ञानस्वरूपे वा स्याऽक्तत्वपूर्वे वा। नाद्यः नत्वध्ययनेनैवार्थज्ञानमिति नियमः संभवी उ
पायांतरेणापि तद्दर्शनात्। न द्वितीयः अनारभ्याधीनत्वेन क्रत्वपूर्वानुपस्थितेः अव्यभिचारिद्वारे
णादि क्रत्वपस्थितिः स्यान्नाचात्र तदस्तिभावेवा वर्णतादिवक्रत्वंगत्वापत्तिः अत एवाध्ययने नियमापू
र्वं नास्ति स्वइष्टमादृष्टानुफलतो नियमस्यवहारइ सेतत्संर्वन्यायरत्नमालायामुक्तं। पुनरप्यपूर्वविधिर्द्वि एम०
विधः।। क्रत्वर्थः पुरुषार्थश्च।। तत्राद्योपयथा समिधोयजतीत्यादिः द्वितीयोपयथाग्निहोत्रं जुहोतीत्यादि २०

रिति। नियमविधिस्तु त्रिविधः। प्रतिनिधिनियमः प्रतिपत्तिविधिस्तदुभयव्यतिरिक्तश्चेति प्रतिनिधि
नियमोऽपि तावदपूर्वविधिवदेव जातिद्रव्यगुणक्रियाविषयत्वेन चतुर्विधः। तत्र जातिप्रतिनिधिनिय
मो यथाश्तीकविधिः। द्रव्यप्रतिनिधिनियमो यथा षष्ठे यदि सन्न्याय दीक्षितानां प्रमीयेत यो ऽस्य नेदि
ष्ठः स्यात्तं तस्य स्थाने दीक्षयेदिति। नेदिष्ठशब्दस्य युवाल्पयोः कनन्यतरस्यामिति युवशब्दादेशाने
दविधानाद्यौगिकत्वेन द्रव्यवाचित्वात्। यद्ययाकृतः पशुः पलायेतान्यं तद्वर्णं तद्वयसमिति तु काती
यं न द्रव्यस्य गुणस्य वा प्रतिनिधिनियमः पशावेव दैवताः पुनर्जायन्ते ऽथ समेध्यो भवतीति वयोव
स्थाविशेषावच्छिन्नस्य कृष्णसारंगोऽग्नीषोमीयः इत्यादिगुणयोगिनश्च मुख्यद्रव्यस्य प्रधानेन प्र
युक्तत्वाद्व्रीहिनाश इव व्रीहिस्थं तराणां। गुणप्रतिनिधिनियमो यथा कातीयानां कृष्णसारंगाभावे लो
हितसारंगविधिरग्नीषोमीयपशौ यदि कृष्णसारंगं न विन्देद्यो ऽपि लोहितसारंगः स्यादिति शत

वाल॰प्र॰ यथा त। क्रियाप्रतिनिधिनियमो यथा प्रत्नं न॰ यदि यजमानः प्रवसेत्प्रजापते विभान्नाम लोक इति
२१ ध्रुवायां यजमानभागमवधाय समिष्टयजुषा सह जुहुयादिति अत्र होमः प्रक्षेपमात्रं देवताभावा
त्। तथाहिताग्निपात्रप्रतिपत्तेर्दक्षिणाहस्ते जुहूमासादयती सा घायाः प्रतिनिधि॰ पत्नी ताहिता।
ग्निपात्रेषु यास्मर्यते पात्राणि तु दहेदग्नौ यजमाने इष्टयास्तत इति तथाहि जाभावे श्राद्धान्नभोजनस
प्रतिनिधि॰ स्मर्यते। हेमाद्रौ देवलः निधाय पवादर्भं वह्नावासने षु समाहितः॰। प्रैषानुप्रैषसंयुक्तं वि
धानं प्रतिपादयेत्॥ निर्दिष्टाप्यन्नमुद्दृश्य पत्रपात्रं ततो गतिः। पात्राभावे क्षिपेदग्नौ गवे दद्यादथाप्सु
वेति॥ प्रतिनिधिनियम॰ सर्वः क्रत्वर्थ एव न पुरुषार्थोपीति न द्विविध॰॥ तथा प्रतिनिधिनियम॰ स
र्वोपि दृष्टार्थ एव नादृष्टार्थोपीति न द्विविधस्त्रिविधो वेति। प्रतिपत्तिविधिस्तु क्रियाविधिरेव न जातिद्र एम॰
व्यगुणविधिरिति न चतुर्विध॰। तथा प्रतिपत्तिविधिर्द्वयोद्देश्यक एव न जातिगुणक्रियोद्देश्यक इति २१

नोद्देश्यचातुर्विध्यादपि चतुर्विधः ४ पुनश्च प्रतिपत्तिः क्रत्वर्थैव न पुरुषार्थेति न द्विविधस्तद्विधिः । पुन
रपि प्रतिपत्तिविधिर्दृष्टादृष्टोभयार्थश्च नादृष्टमात्रार्थोपीति न त्रिविधः ४ । तत्राद्यो यथा चात्वाले कृष्ण
विषाणां प्रास्यतीत्यादिः । द्वितीयो यथा स्विष्टकृद्विधिरिति । पुनश्च द्विविधा प्रतिपत्तिः ४ । सा साक्षाद्वि
नियुक्तप्रतिपाद्यविषया साक्षाद्विनियुक्तोपादानानुषंगसिद्धप्रतिपाद्यविषया च तत्राद्योदाहृतैव द्विती
या यथा । शकृत्य विध्यतीति । प्रतिनिधिप्रतिपत्तिनियमव्यतिरिक्तोपि नियमविधिः प्रतिनिधिविधिवज्जा
त्यादिविषयत्वेन तावच्चतुर्विधः । तत्र जातेर्नियमविधिर्यथा । कपवाको गवेतिः गोपदवदेव हि क्रयवा
क्यमाकस्याधिकरणवार्तिके अद्रव्यशब्दत्वादिति सूत्रेणान्यथासिद्धं यथेउदाहृत द्रव्यस्य नियमविधिर्य
थैकहायन्येति गुणस्य यथारुणयेति । क्रियाया यथा व्रीहीनवहन्तीति सोयं प्रतिनिधिप्रतिपत्तिविधिव्य
तिरिक्तो नियमविधिः पुनर्द्विविधः ४ क्रत्वर्थः ४ पुरुषार्थश्च । अनन्तरोदाहृतश्चतुर्विधः ४ क्रत्वर्थः ४ । । पु

बाल० प्र० रुषार्थो यथा ऋतौ भार्यामुपेयादिति प्राङ्मुखोऽन्नानि भुंजीतेति च ॥ पुनः सोयं नियमविधिस्त्रिविधः दृष्टा
२२ र्थो दृष्टार्थो दृष्टादृष्टोभयार्थश्च । तत्र पुरुषार्थक्रियानियमो नैमित्तिकः सर्वोप्यृतौ भार्यामुपेयादित्यादि
दृष्टादृष्टोभयार्थः इह हि प्रयोजकत्वेन तादर्थ्यमुच्यते नियमादृष्टस्याप्रयोजकत्वादवघातवद्दृष्टार्थत्वा
त् ॥ प्राङ्मुखत्वादेरपि भोजननिरपेक्षणादृष्टमात्रेणाप्रयुक्तेरवघातवद्दृष्टार्थतैव ॥ गमनं तु भार्यामु
खानिच्छोरपि कुह्वादेः ऋतौ निमित्ते अदृष्टार्थं प्रयुङ्क्ते एवं विधिः सुखेच्छुं प्रति तदा तदिति दृष्टादृष्टोभ
यार्थोयं । केवलादृष्टार्थस्तु नियमविधिर्यथा प्रकृतो वैकल्पिकयोर्दृष्टदृष्टयोंतरदृष्टयोरदृष्टार्थयोरन्यत
रस्य क्वचिद्धिकृतो नियमः श्रूयत इति । अत एव नियमविधिवच्च परिसंख्याविधेरपि जात्यादिविषया
ण्युदाहरणानि मृग्याणि । पुनः परिसंख्याविधिर्द्विविधः शेषिपरिसंख्या शेषपरिसंख्या च ॥ आ। एम० २२
घाय यथा इमामगृभ्णन्निति ॥ द्वितीया यथा गृहमेधीये पंचमे पक्षे । यत्तु महत्सोमेश्वरेणापश्रुसोमा

धिकरणेऽशेषपरिसंख्योदाहरणमुक्तं न्यायात्सर्वावयवस्याभावप्रसक्तेकादशावेप   खदानानीमस्यानन्य

प्रयोजनत्वादवयवांतरपरिसंख्यार्थत्वाभ्युपगमेन दाशमिके सिद्धांत इति॥ तदेतदस्मातिर्दशमे पशो

रेकहविष्ट्वमित्यतोऽग्निमेचिकरणे दूषितं॥ मिश्रा हि तत्रास्य हि हि रवद्यतीति संख्याविधिनैकवाक्यता

मेवाहुः। यदिपरं त्वहृदयादिव्यक्तानामेवमामनग्नाभ्यांमिति वत्सत्वतः परिसंख्यात्वं तत्रास्माभिरप्युक्तद्

क्तं वरं तदपि विशसनेऽपि पशुप्रसभिज्ञानात् हृदयादिव्यक्ताभावे पश्चोरेवमध्यात्सर्वार्थाच्च सकृद्यवा

दानं प्राप्नुयात्स्वावयवेभ्य इति निरस्तं। यत्तु तत्र मिश्रैः प   विशसनेन साधनत्वायोगात्सर्वावयवेभ्यो

वदानमप्रसक्तिरूपमासापात एवेत्युक्तं तत्रैव न दूषणमाकसधिकरणवार्त्तिके। पश्वादिषु पत्नीतां गेषु

विशेषबुध्यभावात्सामान्यरूपेव विशसनादिविशिष्टाव हि हेष्टेति यत्नः परिसंख्या हि विधा शाब्दी आ

र्थी च॥ तत्राद्या निषेधरूपैवेति महत्सोमेष्वरः। एवकारेणा शाब्दी परिसंख्येति मिश्राः॥ यथा त्रीणि हवे

बाल० प्र० यज्ञस्योदग्राणि गायत्रीबृहत्सनु : अत्रस्येवावपंस्यत एवोह्यंतीति ॥ आर्थी तु द्विविधा प्राप्तपरिसं॥
२३ ख्या या त्रिदोषा अप्राप्तपरिसंख्या च यात न्हीनासा च फलतः परिसंख्येति गीयते । तत्राद्यायां भाष्य
वार्तिकोक्तं सिद्धांते उदाहरणं नास्ति वक्ष्र्व पक्षे तु गृहमेधीये पंचमे पक्षे स्ति ॥ भाष्यकारेण तरमैतेन्तु ।
सिद्धांतेपि कृविदंगीकृतं । यथा दशमे गिरसां द्विरात्रे कृतं वै सैखानसं स्वैह स्साम भवति षोडश्यु
त्तर इति । तत्र द्विरात्रोत्तमाहानामतिरात्रसंस्थत्वात्प्रकृत्यतिरात्रतः षोडशिविकल्पे प्राप्ते उत्तरे हद्वि
रात्रे [illegible] स्य गृत्स्वतइति वाक्यांतरेणानारभ्याधीतेन नियतः षोडशी स्तुत्तरइसनेना गिरसां द्वि
रात्र एव परिसंख्यापत्तेः तेन द्विरात्रांतरे विकल्प इति भाष्यकारेण तरोक्त ॥ सिद्धांत ॥ शबरस्वामिभिस्तु
परिसंख्यानांगीकृता त्रिदोषत्वात् । वैखानसविधेस्त्वर्थवादः ॥ षोडश्युत्तर इति सांगीकृतमिति । मम राम०
दशार्त्विजइसपि न प्राप्तपरिसंख्या ॥ यद्यपि नवा परिसंख्यानादिति स्त्रकृतानत्र परिसंख्यात्वमे २३

वोक्तंभाष्यकृताचतथैवव्याख्यातंतत्रप्यापिवार्त्तिककृताधिकारणांतेसमर्दशाकृतेरुपसंहारार्थंतेवो
क्ता।तदेतदुपपादितमस्माभिःशास्त्रदीपिकाप्रकाशे॥तस्मात्प्रामपरिसंख्योदाहरणंस्मार्त्तमेवपं
चपंचनखाभक्ष्याइति।अप्रामपरिसंख्योदाहरणंलि मग्न्याम्निसेवापुनःपरिसंख्याद्विविधाकृत्व
र्थापरस्पार्थाच॥सर्वोक्तानिश्रौतान्यायोदाहरणानि।द्वितीयोदाहरणंतुस्मार्त्तमेवपंचपंचनखाभक्ष्या
इति।पुनःपरिसंख्याद्विविधादृष्टार्थाअदृष्टार्थाचतत्रेतरनिवृत्तिःसर्वत्राप्यदृष्टार्थएवविधेया
शस्तुक्वचिद्दृष्टार्थःक्वचिददृष्टार्थः।आद्योपथाइमामगृभ्णान्नंपंचपंचनखाभक्ष्याःत्रीणिहवे।
यज्ञस्योदरणीति॥मंत्रभक्षणावापोद्वापानांदृष्टार्थत्वात्।अदृष्टार्थोदाहरणंतु·गृहमेधीयेपंच
मेपक्षइति॥पुनरपिपरिसंख्याद्विविधानियमतस्तत्रचान्यत्रचप्राप्ताचनियमतस्तत्रचान्यत्रचप्रा
प्तौचेति।तत्राद्योदाहरणमिमामगृभ्णन्निसादिश्रौतं·द्वितीयोदाहरणंतुस्मार्त्तंपंचपंचनखाभक्ष्या

वाल०प्र० इतिपुनरपिविधिर्नेवविधः। अध्याहारेणाविपरिणामेनव्यवहितकल्पनयाव्यवधारणकल्पनया
२५ गुणकल्पनयानुषंगेणयदिशब्दपरित्यागेनरूअध्याहारेणहेतुहेतुमतोर्लिङिति। तत्राद्याःपंचार्थ
25 वाताधिकरणसर्वपक्षेआशंकाभिषेणभाष्यएवोक्ताः। अर्थोवेत्तअध्याहारेणवाविपरिणामे
नव्यवहितकल्पनयावाव्यवधारणकल्पनयावागुणकल्पनयावाकश्चिदर्थःकल्पयितव्यइति॥
अनुषंगस्त्वनुषंगाधिकरणेसिद्धः॥ यदिशब्दपरित्यागादयस्तुत्रयोरथ्यंतराधिकरणपूर्वपक्षेवे।
ष्यधिकरणसिद्धांतोपयोगितयाभाष्येवार्तिकेचोक्ताः। यदिशब्दपरित्यागो व्यध्याहारकल्पनाव्य
वधानेनसंबंधोहेतुहेतुमतोश्चलिङितिः॥ अत्रव्यवधानेनसंबंधः पूर्वोक्ताव्यवहितकल्पनेवः यदिश
ब्दश्रयकृत्वादेरणुपपन्नस्मरणामितिनवैवभेदाः। तत्राद्यचतुष्टयलक्षणार्थःप्राचांसार्धश्लोकःअ एम०
ध्याहारोश्रुतस्यैवोव्यासासोव्यवधिःपदेः। मतोविपरिणामोसौप्रकृतिप्रत्यायान्यथा। वाक्यान्यथा २५

त्वकरणमवधारणाकल्पनेति॥ तत्राध्याहारोदाहरणं यथा विश्वजिता यजेतेति अत्र हि चतुर्थेस्वर्गका
मपदाध्याहार उक्तः॥ अवहितकल्पना यथा रात्रिसत्राधिकरणे प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यत्र
ये प्रतितिष्ठन्ति ते एता रात्रीरुपयन्तीत्यन्वयकल्पनादुक्ता॥ विपरिणामस्याप्येतदुदाहरणं प्रतितिष्ठन्तीति
उपेयुरिति विपरिणामोक्तेः॥ अवधारणाकल्पना यथा वेदोपक्रमे उच्चैर्ऋचा क्रियत इत्यस्योपसंहारे वेद
विषयत्वकल्पनाद्वाक्यपाठादेरुक्ता॥ तथाश्वप्रतिग्रहेष्ट्यधिकरणे दानविषयोपक्रमबलेन यावतोऽश्वा
न्प्रतिगृह्णीयादित्युपसंहारस्य प्रतिग्राहयेदिति दानविषयत्वकल्पनोक्ता॥ नन्वाद्येऽवधारणाकल्पनो
दाहरणे गुणाकल्पनेऽवश्लिष्टिद्वितीयपक्षे प्रकृतिप्रत्यययोरन्यस्यान्यथात्वाद्विपरिणाम एवेति को भेदोऽवधा
रणाकल्पनायाः॥ यद्यपि तल्लक्षणे वाक्यान्यथात्वकरणमिति तद्यपि वाक्यार्थस्यान्यथात्वकरणेन त
त्र प्रतितिष्ठन्तीति विपरिणामोदाहरणेऽप्यविशिष्टं। यद्यपि तु विपरिणामव्याप्त्यैवाक्षेनैकवाक्यतापन्ने

वान्न०प्र० नोपक्रमेणामथ्यात्वमवधारणकल्पनालक्षणं।प्रतिष्ठन्तीति विपरिणामेनानुवर्तमानत्वबाधादुपेयु
२५ रितिवाचाग्रिमफलापेक्षिविधेयैकवाक्यत्वादेवचामथ्यात्वं न केनचिदुपक्रमेणोत्सृज्यते तदपि न फ।
लचमसवाक्ये हि यदि राजन्यं वा वैश्यं वा याजयेदित्युपक्रमात्तमस्मै भक्षं प्रयच्छेदित्युपसंहारे तेन यजे
25 तिकल्पनाद्वाभ्येव सैषाप्यवधारणकल्पनेत्युक्तेर्निर्विवादामवदामवधारणकल्पना।वार्तिके तु तदा
धिकरणान्ते एतेन रत्नीकानभिषुणुयादित्यादीनि व्याख्यातानीत्युक्तेर्यदि सोमं न विन्देत रत्नीकानभि
षुणुयादित्यस्योदाहरणत्वोक्तावत्र यागोपक्रमाभावादव्याप्तिः स्यात्।।उच्यते।यदि सोमं न विन्देत
इत्युपक्रमादेव तत्रापि रत्नीकानां यागसाधनता कल्प्यते।यागसाधनीभूतः सोमो यदि न लभ्येतेत्युक्ते
हि इदमवगम्यते किञ्चिदत्र यागसाधनं विधित्सितम् अस्तीति।अन्यथा सोमालाभोक्तिरनर्थिकै एम०
व स्यादिति।गुणकल्पना यथा।इष्टीरुपदधाति प्राणभृत उपदधातीति।।सर्वत्राप्तेष्टिलिंगात्रप्र २५

नरत्वाप्राणाम्भक्षद्वेपि ता अपि मंत्राणां गौणप्रार्थस्योक्ता विधीयंत इति ॥ तथा श्येन चितं चिन्वीत स्वर्गकाम
इति प्रकृत चयनाश्रितः श्येन सादृश्यं गुणः फलाय विधीयते। अत्र हि कर्मणि हनस्य नत्रुपपदार्थे कर्म
णि समनुवर्त्तमाने कर्मण्युपमाया मिति कर्मण्युपच्छि विधे श्येनं चीयमानमिति प्रतीतेः सामानाधिकरण्यो
पपत्ते श्येनसादृश्यमिति गौणा कल्पते। पृथग्र्थोदाहरणं चैतत्। अनुषंगेण विधिस्तु द्विविधः पुरस्तादनु
षंगः परस्तादनुषंगश्च। तत्राद्यो यथा यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वात
मभिघारयेत् यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेवमित्यत्र ऐन्द्रं वैश्वदेवमित्यतः परं मध्ये निधायेत्याद्यनुषज्यते
तदुक्तमवेष्ट्यधिकरणवार्त्तिके राजन्यस्यापि ब्राह्मणवैश्यवदेव कर्मान्तरेणामयोगान्तरेण वा संबन्धस्त
स्या एवं च तस्यापि मध्यनिधानवाक्यान्तःप्रयोगे सत्युपपद्यत इति ॥ परस्तादनुषंगो यथा अथैष ज्यो
तिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र एतेनेत्यादि सर्ववाक्यत्रयेऽनुषज्य

वाल० प्र० ते॥ यदिशब्दपरित्यागेन विधिस्तु यद्यपि वार्त्तिके यदि ब्राह्मणो यजेनेसत्र उत्तरपक्षस्थापनाय द्वयोपरि
२६ तोषमिषेणाहूषितः परित्यागाद्धृमध्याहृत्यस्मरणमिति मत्वा अथवा यदि रोचेतेति दर्शयन्नीति ग्रंथेन
26 तथापि यदिशब्दसमानार्थकपक्षे शब्दपरित्यागोदाहरणं पराग्नेयोष्टाकपालस्स्यादेव यदिशब्दपरित्या
गस्याने भिषिच्योदाहार्य। यद्वाहृत्यध्याहारसंभवे यदिशब्दपरित्यागो न युक्तः अवधानेन संबंधसंभवे
हृत्यध्याहारोप्ययुक्तः हेतुहेतुमल्लिङ्संभवे अवधानेन संबंधोप्ययुक्त इति वार्त्तिके उक्तं अतो यत्र हृत्य।
ध्याहारमवदितकल्पना हेतुमल्लिङ्कल्पनरूपपक्षत्रयं न संभवति तत्र यदिशब्दपरित्यागे उदाहार्यं
यथा यद्यातुरः स्यान्मनसा वाचा वा समस्येदिति। अत्र हि यदि रोचेत रथंतरसामा सोमः स्यादितिवद्य
दि रोचेत आतुरः स्यादिति हृत्यध्याहारो न संभवत्यातुरतायाः अविधेयत्वात्। एवं अवधानेन संबंधो न राम०
संभवति॥ स हि रह्मीयादिति लिङ्कामप्रवेदने ऽ कश्चिनीसंगीकृत्य यद्येद्वा यवाग्रान्यहान्यहीतुमिच्छे २६

रथंतरसामा सोमः स्यात्कार्यं इतिवद्यदि मन्त्र सा वा चा वा सम्मितु मिच्छेदातुरः स्यादिति कस्मैतन्न चै
तत्संभवति आतुरतायाश्च अविधेयत्वादेव। एवं यद्यातुरः स्यादिसत्र हेतुहेतुमतोर्लिङ् इति पक्षोऽपि न
संभवति॥ ऐंद्रवायवाग्रान्ग्रहान्गृह्णीयादिति हेतुमल्लिङ्पक्षे हि यग्रहणारूपफलस्य हेतुः रथं
तरसामा सोमः कार्यं इतिवदिह भवसा वा चा वा सम्मस्येदिति हेतुमल्लिङ्पक्षे सम्मासरूपफलस्य हेतु
रातुरः कार्यं इत्यर्थो वाच्यः न चैतत्संभवति आतुरतायाश्च अविधेयत्वादेव। न च हेतुलिङ् संभवः। तदा
हि रथंतरसामा सोमः स्यादिति हेतौ लिङ् ग्रहान्गृह्णीयादिति विधावेव। ततश्च रथंतरसाम सोमहेतुकं
ग्रहायत्वं कार्यमिति वदिह यद्यातुरः स्यादिति लिङ् हेतौ सम्मस्येदिति विधौ ततश्चातुरता हेतुकः सम्मा
सः कार्य इत्यर्थो वाच्यः न चासौ संभवति सोमयागस्य हि शेषित्वात्प्रयोजकत्वात्स्वं हेतुत्वं संभवति न त्वा
तुरतायाश्च शेषित्वादनिमित्तत्वाच्च। तस्मादातुरवाक्ये हृमध्याहाररव्यवधानसंबंधहेतुमल्लिङ्पक्षाणां

मसंभवादानुरवाक्यं यदि शब्दपरिसागस्यैवासंकीर्णमुदाहरणमिति ॥ रुच अध्याहारपक्षे तु यद्यपि वार्त्ति
केयदि ब्राह्मणो यजेत मत्र उत्तरपक्षो स्थापनाय सर्वापरितोषमाजेन दूषितः । अध्याहारादपि स्वपद
हत्तिरेव व्यवहितकल्पनयात्त्वीपसीधर्ममात्रबाधादिति ग्रंथेन तथापि यत्र लिङ् ह्याभावाद्यस्य येन
संबंधः कामप्रवेदने चगत्स्त्रीयादिति लिङ् छांमसापयतीति वार्त्तिको क्तत्तीयपक्षस्य हेतुहेतुमतोर्लि
ङ् इति चतुर्थपक्षस्य चासंभवस्तत्र रुच अध्याहारः संभवत्येव । तादृशमुदाहरणं मृग्यं । व्यवहितकल्पना
पक्षोऽपि यदि ब्राह्मणो मजेत मत्र वार्त्तिककृता हेतुहेतुमतोर्लिङ् इति पक्षसंभवे निराकृतः विनैव व्यव
हितकल्पनया प्यर्थं पक्षो भवन्त्वलवत्तरः इति मन्वानो हेतुहेतुमतोर्लिङित्युपन्यस्यतीति ग्रंथेन तथापि
यत्र हेतुहेतुमतोर्लिङ् सस्य विषयो नास्ति यतितिएं तिह वाय एता रात्रीरुपयंतीति लद्यप्रयोगात्तत्र व्यव
हितकल्पनो दाहरणं संभवतीत्यतः एवमुदाहृतं । हेतुहेतुमतोर्लिङ् सत्रोदाहरणं तु यदि ब्राह्मणो

यजेतेसायेव॥ तत्र हेतुः कारणं हेतुमान्फलं। तत्रापि विधाद्वयं। ब्राह्मणो यजेतेति हेतौ लिङ्। अभिघा
रयेदिति विधावेव तेनायमर्थः ब्राह्मणकर्तृकयागहेतुकमध्यनिधानपूर्वकमभिघारणं कार्यमिति। न
चाक्रियमाणो यागो हेतुत्वं प्रतिपद्यते इष्टार्थो हि तो भवतीति। अथवा हेतुमत्समभिघारयेदिति लिङ्।
ब्राह्मणो यजेतेति विधावेव। अनुक्तमपि च यागस्य हेतुत्वं हेतुमदाक्षेपात्संनिधेश्च भविष्यति॥ तत्रायम
र्थः। मध्यनिधानपूर्वकहोमपूर्वकाभिघारणरूपफलहेतुभूतो ब्राह्मणकर्तृको यागः कार्य इति प्रनिषे
धोपि द्विविधः प्रसक्तः कल्पश्च। प्रसक्तोप्यनेकधावस्थते। कल्पोपि सप्तधा स्मृतिकल्पः आचारकल्प
ः निषेधकल्पः अर्थवादकल्पः मंत्रकल्पः प्रायश्चित्तकल्पो दण्डकल्पश्च। तत्र स्मृतिकल्पो यथा सगो
त्रान्परिणयेत्सादिः। आचारकल्पो यथा हरिवासरपरिभाषिते काले पारणा निषेधः। निषेधकल्पो
यथा विशिष्टनिषेधाद्विशेषणनिषेधः अर्थवादकल्पो द्विविधः स्वतंत्रार्थवादकल्पो विध्यंतर

बा॰ल॰प्र॰ शेषार्थवादकल्पश्च॥ आद्योपि द्विविधः दोषार्थवादकल्पः सिद्धवत्कीर्तनार्थवादकल्पश्च॥ प्राद्यो य
२८ थास्मार्तेः मिथ्याभिशंसने दोषो हि सम्मोऽनृतवादिनः मिथ्याभिशस्त दोषं च समादत्ते मृषा वदन्निति
॥ द्वितीयो यथाग्निहोत्रप्रकरणे तस्माद्वत्सं जातं दशरात्रीर्न दुहंतीति। जातं वत्समनुलक्षीकृत्य तदनंतरं द
शरात्रं गौर्न दोह्येति सिद्धवत्कीर्तनामथानुपपन्नान्निषेधः कल्प्यते यदाग्नेयोऽष्टाकपालो मावास्यायां।
पौर्णमास्यां चाच्युतो भवतीति विधिवदिति। विध्यंतरशेषार्थवादकल्पो यथा तस्मादारापमेवाश्नीय
दिति विधिशेषेणानवारण्ते माषान्हविर्गृह्णतीत्यनेन माषनिषेधः कल्प्यते उपरि हि मे देवेभ्यो धारयती
ति विधिवदिति। मंत्रकल्पोपि निषेधो विधिवद्द्विधा मंत्रगतस्यैव नञ्युक्तवर्तमानापदेशस्य निषेधत्वक
ल्पनात्। निषेधयुक्तवाक्यांतरकल्पनाच्च। आद्योदाहरणं मृग्यं। द्वितीयो यथा मोघमन्नं विंदते अप्रचे एम॰
ता इति। प्रायश्चित्तकल्पो यथा तदाऊर्ध्वे आहिताग्निर्यदि स्तत कान्नं प्राश्नीयात्कातत्र प्रायश्चित्तिरिति २८

सोग्नयेनंतुमते ष्टाकपालं पुरोडाशं निर्वपेदिति। दंडकल्पो यथा कर्मप्रदीपे यज्जन्मये हि सोमश्चेद्ब्राह्मणं प
दिशि दृश्यते। तत्र मासैर्निमित्तैर्दत्त्वा दंडं दद्याद्धि यथाजातय इति। नेयं दक्षिणाक्षलिङ्गभावात्॥ अत्र च द
र्वदिने न्वाधाने दंडविधिरेव कल्प्यः तेन तु निषेधः कल्प्यत इति। स्त्रसादिकल्पोपि निषेधो यथासंभवं
जातिव्यक्तिगुणक्रियाविषयत्वेन चतुर्विधः। तत्राद्यो यथा श्राद्धे वणिकादिनिषेधः। मरीचिः कुलस्था
श्वणाकाः श्राद्धे न देयाश्चैव कोद्रवा इति। व्यक्तिनिषेधो यथा श्राद्ध एव रोग्यादिनिषेधः याज्ञवल्क्यः। रोगी
हीनातिरिक्तांगः काणः पौनर्भवस्तथेति। रोग्यादिशब्दस्य योगिकत्वात्। गुणनिषेधो यथा मरीचिः। कटु
कानि च सर्वाणि विरसानि तथैव चेति। क्रियानिषेधो यथाह मनुः ऋतुकाले नियुक्तो वा नैव गच्छेत्स्त्रि
यं क्वचिदिति। पुनः स्मार्त्तादिनिषेधो द्विविधः क्रत्वर्थः पुरुषार्थश्च। तत्राद्यो यथा उक्त एव चतुर्विधः।
पुरुषार्थस्तु क्रियानिषेधः स्मार्त्तो यथा मनुः सुरा वै मलमन्नानां पाप्मा च मलमुच्यते। तस्माद्ब्राह्मणरा

जन्मो वै त्रय ऋणवान् सुरां षि वेदिति। पुनः स्मार्त्तादिनिषेधो द्विविधः अदृष्टार्थो दृष्टार्थश्च। पूर्वोदाहृतः सर्वो
प्यदृष्टार्थ एव। दृष्टार्थो यथा विवाहे अरोगिणीमित्यादिः। तदुक्तं विज्ञानेश्वरेणारोगिण्यादिषु तु दृष्टवि
रोध एवेति। क्रत्वर्थोऽपि स्मार्त्तादिर्निषेधो द्विविधः पुरुषार्थमात्रविषयकः क्रत्वर्थमात्रविषयकश्च
आद्यो यथा श्राद्धभुक्तादौ मैथुनादिनिषेधः। द्वितीयो यथा श्राद्धे विहितस्यापि मांसस्य निषेधः कलौ
अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु। देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेदिति निगमः। तथा शा
मित्रं चैव विप्राणामिति। पुरुषार्थे तु स्मार्त्तादिनिषेध एकविध एव। पुरुषार्थमात्रविषयकः क्रत्वर्थमात्र
विषयकस्तु नास्त्येवोदाहरणाभावात्। पुरुषार्थमात्रविषयकोऽपि पुरुषार्थनिषेधो द्विविधः रागप्राप्तविष
यकः विधिप्राप्तविषयकश्च। आद्यो यथोदाहृतो मानवः सुरानिषेधः। द्वितीयो यथाष्टेतस्यापायावदुक्त रम०
मित्यधिकारे स्त्रियाध्ययननिषेध इति॥ प्रसक्तो निषेधः श्रौतः सोऽपि चतुर्विधः। जातिनिषेधो व्यक्ति २९

निषेधो गुणनिषेधः क्रियानिषेधश्चेति। तत्र जातिनिषेधो यथा॰ तस्माद्बर्हिषि रजतं न देयमिति। अक्रि
निषेधः श्रौतो यथा नासोमयाजी सन्नयेदिति। असोमयाजिपदस्य यौगिकत्वात्। कर्तृनिषेध एव चायं
न क्रियानिषेधः तथात्वे विहितक्रियानिषेधात्तेनैव विकल्पसिद्धौ दर्शमेतदुसमेव नयेदिति मतिप्रसवबले
नैविकल्पोक्तिरयुक्ता स्यादिति गुणनिषेधः श्रौतो यथा। षष्ठे सप्तमपादे आधाने एकादेयाद्वादशदेया द
सादिविधापाम्नातमपरिमितं देयमिति तत्र पूर्वपक्षितमयं पूर्वोक्तसर्वसंख्याप्रतिषेध इति। स्थितोदाह
रणं तु मृग्यं। क्रियानिषेधः श्रौतो यथा। नातिरात्रे षोडशिनं गृह्णातीति। पुनः श्रौतो निषेधो द्विविधः क्रत्व
र्थः पुरुषार्थश्च। तत्र पूर्वोदाहृतश्चतुर्विधोपि क्रत्वर्थः। पुरुषार्थास्तु जातिद्रव्यगुणनिषेधाः श्रौता न संसे
वा। पुरुषार्थस्तु श्रौतः क्रियानिषेधो यथा। तस्माद्ब्राह्मणः सुरां न पिबेदिति नञ्टीकायां वार्त्तिककृतोक्तः। प्र
त्यक्षश्च निषेधः सर्वोप्यदृष्टार्थ एव दृष्टार्थस्तु नास्त्येव। क्रत्वर्थश्च श्रौतो निषेधविधः पुरुषार्थमात्रविषय

वा॰न॰प्र॰ कः क्रत्वर्थमात्रविषयकविषयश्च। आद्योपि द्विविधः रागप्राप्तविषयो विधिप्राप्तविषयश्च। तत्राद्यो क्रत्व
३० र्थमात्रविषयकोयष्यो यथा स्नुपायमांसभक्षणादि पुरुषार्थमपि प्राप्तितः प्रतिषेधः क्रतोरंगमिष्टः प्रकरणा
द्यपादिति व्याकरणाधिकरणउक्तः। विधिप्राप्तपुरुषार्थमात्रविषयः क्रत्वर्थो निषेधो यथा दीक्षितो न द
30 दाति न जुहोतीति। तदेतद् दशमे उक्तं क्रत्वर्थमात्रविषयको यथा दाहत एव नातिरात्रे षोडशिनं गृह्णाती
ति क्रत्वर्थपुरुषार्थोभयविषयः क्रत्वर्थः श्रौती निषेधो यथा दर्शपूर्णमासांगं नानृतं वदेदिति क्षेमि
व्रीहिभिर्यक्ष्य इति संकल्प्य यवैर्यजानस्य यत्र व्रीहिसंकल्परूपमनृतं क्रत्वर्थं प्रसज्यते तत्र द्विपयो
भवति भवति न पुरुषार्थरागप्राप्तमानृतवदनविषयेऽपीत्युक्तं तृतीये अकर्मक्रतुसंयुक्तं संयोगान्नि
त्यानुवादः स्यादित्यत्र। पुरुषार्थस्तु श्रौत निषेध एकविध एव पुरुषार्थमात्रविषयक इति। क्रत्वर्थमा राम
त्रविषयकस्तु पुरुषार्थो निषेधो नास्त्येव उदाहरणासंभवात्। सत्यनारभ्याधीतोपि न पुरुषार्थं फ ३०

लकल्पनामसंगात्कलर्थत्वमुक्तः कत्वव्यभिचारिकत्वर्थनिषेध्यद्वारा एकतोरूपस्थितेः पुरुषार्थ
मात्रविषयकः पुरुषार्थः श्रौतनिषेधोपि द्विविधः। रागप्राप्तविषयो विधिप्राप्तविषयश्च। आद्यो यथा
नहिंस्यात्सर्वा भूतानीति तथा पञ्चनखमयो नैकलंजभक्षयेत्तस्मात् घृपोनोपस्पृश्य इतो रागप्राप्तकलं
जभक्षणादिपापस्पर्शनेन निषेधो पुरुषार्थो वित्युक्तं द्वितीयो यथा असोमयाजिनः सान्नाय्यनिषेधः
सोपि कर्तृनिषेधेन फलितः। पुनरपि प्रतिषेधः षोढा सामान्यप्रतिषेधश्चेति। तत्राद्यो यथा नहि +षो
विशेषप्रतिषेधः प्रतिप्रसवरूपः प्रतिषेधोभ्यनुज्ञारूपः प्रतिषेधः उपसंहाररूपः प्रतिषेधः व्यव
स्थारूपः प्रतिषेधः + स्यात्सर्वा भूतानीति। द्वितीयो यथा। ब्राह्मणं न हन्यादिति। तृतीयो यथा नहि
स्यादित्यस्य गां न हन्यादित्यस्य वा गोरनुबन्ध्य इति बाधप्रसक्तेः पुनः कलौ प्रतिप्रसवो सतां गोपशुश्चे
ति। अभ्यनुज्ञारूपः प्रतिषेधो यथा। एषपंथा एतत्कर्मेत्येतेनरपि द्वितीयारण्यकेन स्मार्तकाल एव हत्वा

बाल०प्र० त्काले न दद्यादिति। अन्यकाले दारिद्र्याद्यवस्थारूपे न दद्यादिति न दाने दोषः प्रतिपाद्यते न हि भो
३१ जनमात्रपर्याप्तवतोप्यतिथ्याद्यागमने तस्मै तद्दत्वा स्वयमनशनं कुर्वतोपि दोषोपपद्यते तथात्वे
सक्तुप्रस्थस्य सर्वोपि विप्रान्नयज्ञः सहृशो मतः इत्याद्युपाख्यानविरोधात्। तस्मात्काले न दद्यादित्यस्य
31 नुद्दैवेति तत्रादृदन्तर्दे षष्ठीयइति। उपसंहाररूपः प्रतिषेधो यथा। मत्तानुगमनं नास्ति ब्राह्मण्या ब्रह्म
शासनादिति सामान्यनिषेधः ४ एषपद्धतिं समारूढ़ नविप्रागंतुमर्हतीत्यनेन विशेषे उपसंह्रिय
ते। क्वत्थोदाहरणं तद्धेमाद्रौ। पैठीनसिः। छत्राकं नालिकापोतीककुसुंभाश्मंतकांश्चेति शाका
नामभक्ष्या इति। न हि छत्राकसामान्यनिषेधकं कं श्रूयते न छत्राकं कुंभांडं च विवर्जयेदिति देवल
वचनेन विशेषे उपसंह्रियते। व्यवस्थितः प्रतिषेधोपि धा देशतो व्यवस्थितः कालतो व्यवस्थि एम०
तः कर्तृतो व्यवस्थितः कर्मतो व्यवस्थितो निमित्ततो व्यवस्थितः संस्कार्यतो व्यवस्थितश्चेति। तत्र ३१

फलतो व्यवस्थितश्च

देशतोव्यवस्थितोनिषेधोयथा।कच्छपस्थादिकंमांसंनांगीकुर्वंतिकेचन।येपीच्छंतिनतेषामपीष्टोविं
ध्यस्यदसिणाइतित्रिकांडमंडने।कालतोव्यवस्थितोनिषेधोयथा।कलौगवालंभनिषेधः।कर्तृतोव्यव
स्थितोनिषेधोयथा।नासोमयाजीसंनयेदिति।कर्मतोव्यवस्थितोनिषेधोयथा।कातीयसूत्रेप्रजाकामस्य
नवसप्त ख्योतिरात्रोनामप्रथमः।ज्येष्ठस्यज्येष्ठिनेपस्यविषुवान्नामद्वितीयः।भ्रातृव्यवतोमोनमि
त्रतीयः।स्वर्गकामस्यामयाविनोवाभ्युनमिचतुर्थः।ऋद्धिकामस्यज्योतिष्टोमातिरात्रोनामपंचमः
पशुकामस्यविश्वजिदतिरात्रोनामषष्टः।ब्रह्मवर्चसकामस्यत्रिवृदतिरात्रोनामसप्तमः।वीर्यकामस्यपं
चदशातिरात्रोनामाष्टमः।अन्नाद्यकामस्यसप्तदशातिरात्रोनामनवमः।प्रतिष्ठाकामस्यएकविंशाति
रात्रोनामदशमः।असोर्यामातिरात्रोनामैकादशः।अभिजिदतिरात्रोनामभ्रातृव्यवतोद्वादशः।सर्वस्तो
मातिरात्रोनामबुभूषतस्त्रयोदशइतित्रयोदशातिरात्रान्स्यमाराणांस्त्रयोदशातिरात्राइत्युपक्रम्य

मीमांसा मंत्र
६२०

मंत्रभेदनिरूपणम्